M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.

Ser. 321

Title: Siddhānta-kaumudī

~~3206~~

C 321

:	: સિદ્ધાંતકૌમુદી	: **Title**
:	: ભટ્ટોજિ દીક્ષિત.	: Author
:	:	: Editor
:	:	: Year, Vols.
:	:	: Publisher
:	:	: Remarks

श्रीगणेशायनमः॥ ॥धातोः॥ आतृतीयसमाप्तेरधिकारोयं॥ तत्रोपपदंसप्तमीस्थं॥ कृदतिङ्॥ वासरूपोस्त्रियां॥ परि
भाषेयं॥ अस्मिन्धात्वधिकारेसरूपोपवादप्रत्ययउत्सर्गस्यबाधकोवास्यात स्त्र्यधिकारोक्तंविना॥ कृत्याः॥ अधिकारो
यं॥ ण्वुलःप्राक्॥ कर्त्तरिकृत॥ कृत्प्रत्ययःकर्त्तरिस्यादितिप्राप्ते॥ तयोरेवकृत्यक्तखलर्थाः॥ एतेभावकर्मणोरेवस्युः॥ तव्य
त्तव्यानीयरः॥ धातोरेतेप्रत्ययास्युः॥ तकाररेफौस्वरार्थौ॥ एधितव्यं एधनीयंत्वया॥ भावेऔत्सर्गिकमेकवचनंक्लीब
त्वंच॥ चेतव्यश्चयनीयोवाधर्मस्त्वया॥ वसेस्तव्यत्कर्त्तरिणिच्च॥ वसतीतिवास्तव्यः॥ केलिमरउपसंख्यानं॥ पचेलिमामा
पक्तव्याः षाः॥ भिदेलिमाःसरलाः॥ भेत्तव्याः कर्मणिप्रत्ययः॥ वृत्तिकारस्तुकर्मकर्त्तरिचायमिष्यतइत्याह॥ तद्भाष्यविरुद्धं॥ कृत्य
चः॥ उपसर्गस्थान्निमित्तात्परस्याचउत्तरस्यकृतस्थस्यनस्यणत्वंस्यात॥ प्रयाणीयं॥ अचः किं॥ प्रमग्नः॥ निर्विण्णस्या
पसंख्यानं॥ अचःपरत्वाभावान्नकारेणव्यवधानाच्चाप्राप्तेवचनं॥ परस्यणत्वंपूर्वस्यष्टुत्वं॥ निर्विण्णः॥ णेर्विभाषा॥ उ
पसर्गस्थान्निमित्तात्परस्यण्यंताद्विहितोयःकृत्तत्स्थस्यनस्यणोवास्यात॥ प्रयापणीयं॥ प्रयापनीयं॥ विहितविशेष
णंकिं॥ यकारव्यवधानेयथास्यात॥ प्रयाप्यमाणंपयः॥ णत्वेउरउपसर्गत्वंनेतिउक्तं॥ ऊर्याणं ऊर्यापनं॥ हलश्चेजु

पधात्॥ हलादेरिजुपधात्कृन्तस्याचः परस्य णो वा स्यात्॥ प्रकोपणीयं। प्रकोपनीयं। हलादेरिति किं॥ प्रोहणीयं। इजुप
धात् किं। प्रवपणीयं। इजादेः सनुमः॥ सनुमश्चेद्भवति इजादेर्हलंताद्विहितो यः कृत् तदुस्येव॥ प्रेंखणीयं। इजादेः किं
मगि सर्पणे। प्रमंगनीयं। नुम्ग्रहणमनुस्वारोपलक्षणं॥ अट्कुप्वाङिति सूत्रेप्येवं॥ तेनेह न। इ विव्याप्तौ॥ प्रेन्वनं॥ इह
नुस्यादेव॥ प्रोंभणं॥ वा निंसनिक्षनिंदां॥ एषां नस्य णो वा कृति परे॥ प्रणिंसितव्यं। प्रनिंसितव्यं॥ न भाभूपूकमिगमि
प्यायीवेपां॥ एभ्यः कृन्नस्य णो न॥ प्रभानीयं। प्रभवनीयं। पूञ एव ग्रहणमिष्यते। पूङ्स्तु प्रवपणीयः सोमः॥ ण्यंतभा
दीनामुपसंख्यानं। प्रभापनीयं॥ ख्याञः शस्य यो वस्फक्तं॥ णत्वप्रकरणोपरि तद्बोध्यं॥ ख्युस्यासिद्धत्वेन त्राकारव्य
वधानात् णत्वं॥ प्रख्यानीयं॥ कृत्यल्युटो बहुलं॥ स्नात्यनेन स्नानीयं चूर्णं॥ दीयतेस्मै दानीयो विप्रः॥ अचो यत्॥ अजंता
द्धातोर्यत्॥ चेयं। जेयं। अज्ग्रहणं शक्यमकर्तुं॥ योगविभागोप्येवं॥ तव्यदादिष्ववयतोपि सूपठितत्वात्॥ ईद्यति॥
यतिपरे आत ई स्यात्॥ गुणः देयं। ग्लेयं। तकिशसिचतियतिजनिभ्यो यद्वाच्यः॥ तक्यं। शस्यं। चत्यं। यत्यं। जन्यं।
जनेर्यद्विधिः स्वरार्थः॥ ण्यतापि रूपसिद्धेः॥ न च वृद्धिप्रसंगः॥ जनिवध्योश्चेति निषेधात्॥ हनो वा यद्वधश्च वक्तव्यः॥

वध्यः। पक्षे वक्ष्यमाणो ण्यत्॥ घात्यः॥ पोरदुपधात्॥ पवर्गांताददुपधाद्यत्स्यात्॥ ण्यतोपवादः॥ शप्यं। लभ्यं। नानुबंधकृत
मसारूप्यं॥ अतो न ण्यत्॥ तव्यदादयस्तु स्युरेव॥ आङो यि॥ आङः परस्य लभेर्नुम् स्यात् यादौ प्रत्यये विवक्षिते॥ नुमि
कृते अदुपधत्वाभावाण्ण्यदेव॥ आलंभ्यो गौः॥ उपात्प्रशंसायां॥ उपलंभ्यः साधुः॥ स्तुतौ किं॥ उपलब्धुं शक्य उपल
भ्यः॥ शकिसहोश्च॥ शक्यं। सह्यं। गदमदचरयमश्चानुपसर्गे॥ गद्यं। मद्यं। चर्यं। यम्यं। चरेराङि चागुरौ॥ आचर्यो दे
शः। गंतव्य इत्यर्थः॥ अगुरौ किं। आचार्यो गुरुः॥ यमेर्नियमार्थं। सोपसर्गान्मा भूदिति॥ प्रयाम्यं। निपूर्वात्स्यादेव।
तेन न तत्र भवेद्विनियम्यमिति वार्तिकप्रयोगात्॥ एतेनानियम्यस्यनायुक्तिः॥ त्वयानियम्यान्ननु दिव्यचक्षुषेत्या
दिव्याख्यातं॥ नियमे साधुरिति वा॥ अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु॥ वदेर्नञि उपपदे वदः सुपीति यत्
क्यपोः प्राप्तयोर्यदेव सोपि गर्हायामेवेत्येकभयार्थ निपातनं॥ अवद्यं पापं॥ गर्ह्ये किं। अनूद्यं गुरुनाम। तद्धि न गर्ह्यं वच
नानर्हं च। आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥ इति स्मृतेः॥ पण्या
गौः॥ व्यवहर्तव्येत्यर्थः॥ पाण्यमन्यत्। स्तुत्यर्हमित्यर्थः॥ अनिरोधो प्रतिबंधः। तस्मिन्विषये वृङो यत्। शतेन

वर्याकन्या।वृत्यावा।वह्यंकरणं॥वहत्यनेनेतिवह्यं।शाकटं।करणंकिं।वाह्यंवोढव्यं।अर्यस्वामिवैश्ययोः॥ऋगतौ।अ
स्माद्यत्॥ण्यतोपवादः॥अर्यस्वामीवैश्योवा।अनयोःकिं॥आर्योब्राह्मणः॥प्राप्तव्यइत्यर्थः॥उपसर्याकाल्याप्र
जने॥प्रजननंगर्भग्रहणंचेदित्यर्थः॥उपसर्यागौः॥गर्भाधानार्थंवृषभेणोपगंतुंयोग्येत्यर्थः॥प्रजननेकाल्येतिकिं॥उ
पसर्याकाशीप्राप्तव्येत्यर्थः॥अजर्यंसंगतं॥नञ्पूर्वाज्जीर्यतेःकर्त्तरियत्संगतंचेद्विशेष्यं।नजीर्यतीत्यजर्यं।तेनसं
गतमार्येणरामाजर्यंकुरुद्रुतमितिभट्टिः॥मृगैरजर्यंजरसोपदिष्टमदेहबंधायपुनर्बबंधेत्यत्रसंगतमितिविशेष्यमध्या
हार्यं।संगतंकिं॥अजरिताकंबलः॥भावेतुसंगतकर्त्तृकेपिण्यदेव।अजार्यंसंगतेन।वदःसुपिक्यप्च॥उत्तरसूत्रादि
हभावइत्याकृष्यते।वदेर्भावेक्यप्स्यात्यच्च।अनुपसर्गेसुप्युपपदे॥ब्रह्मोद्यं।ब्रह्मवद्यं।ब्रह्मवेदः।तस्यवदनमित्य
र्थः।कर्मणिप्रत्ययावित्येके।उपसर्गेतुण्यदेव।अनुवाद्यं।अपवाद्यं।भुवोभावे।क्यप्स्यात्।ब्रह्मणोभावोब्रह्मभू
यं।सुपीत्येव।भव्यं।अनुपसर्गइत्येव।प्रभव्यं।हनस्तच॥अनुपसर्गेसुप्युपपदेहंतेर्भावेक्यप्स्यात्तकारश्चांतादेशः॥
ब्रह्मणोहननंब्रह्महत्या।स्त्रीत्वंलोकात्।एतिस्तुशास्वृदृजुषःक्यप्॥एभ्यःक्यप्स्यात्॥ह्रस्वस्यपितिकृतितुक्॥

इत्यः।स्तुत्यः।शासइदङ्हलोः॥शिष्यः।वृइतिवृञोग्रहणं।नवृङः।वृत्यः।वृङःस्तुवार्याऋत्विजः॥आदृत्यः।जुष्यः।पुनःक्यबु
क्तिःपरस्यापिण्यतोबाधनार्था।अवश्यस्तुत्यः।शासिदुहिगुहिभ्योवेतिकाशिका।शास्यं।शिष्यं।दुह्यं।दोह्यं।गुह्यं।गोह्यं।
प्रशास्यस्यश्रः।ईउवंदवृशासुहामितिसूत्रद्वयबलाच्छंसेःसिद्धमितरयोस्तुमूलंमृग्यं।आङ्पूर्वादंजेःसंज्ञायामुपसंख्या
नं॥आज्यंव्यक्तिम्रक्षणादिषुबाहुलकात्करणेक्यप्॥अनिदितामितिनलोपः॥आज्यं॥ऋदुपधाच्चाकॢपिचृतेः।वृत्।वृत्यं।
वध्यं।कृपिचृत्योस्तुकल्प्यंचर्त्यं।तपरकरणंकिं।कृत्।कीर्त्यं।अनित्यंण्यंतास्चुरादयः।इतिणिजभावेण्यत्।णिजंता
द्यदेव।ईचखनः।चात्क्यप्।आद्गुणः।खेयं।इचेतिह्रस्वःसुपठः।भृञोसंज्ञायां॥भृत्याःकर्मकराः।भर्त्तव्याइत्यर्थः॥
क्रियाशब्दोयंनतुसंज्ञा।समवश्चबहुलं।संभृत्याःसंभार्याः।असंज्ञायामेवविकल्पार्थमिदंवार्त्तिकं।असंज्ञाकिं।भार्या
नामक्षत्रियाः।अथकथंभार्यावधूरिति।इहहिसंज्ञायांसमजेतिक्यपाभाव्यं।संज्ञापर्युदासस्तुपुंसिचरितार्थः।सत्यं।
बिभर्त्तेर्भेइतिदीर्घात्तात्त्र्यादेर्वाण्यत्।क्यप्तुभरतेरेवतदनुबंधग्रहणेइतिपरिभाषया।मृजेर्विभाषा॥क्यप्वास्या
त्॥पक्षेण्यत्॥चजोःकुघिण्यतोः॥चस्यजस्यचकुत्वंस्यात्घितिण्यतिचपरे।मृजेर्वृद्धिः।मार्ग्यः॥न्यंक्वादीनांच॥कुत्व

स्यात्। न्यंकुः। नावंचेरुः। राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ एतेसप्तक्यबंतानिपात्यंते। राज्ञासोतव्योऽभिषव
द्वारानिष्पादयितव्यः। यद्वालतात्मकः सोमोराजासस्सूयतेकण्ड्यतेत्रेत्यधिकरणेक्यप्। निपातनाद्दीर्घः। राजसूयः। ~~सूर्य~~ सूर्यः।
अर्धर्चादिः। सरत्याकाशेसूर्यः। क्यप्। निपातनादुत्वमेव। यद्वाषूप्रेरणेतुदादिः। सुवतिकर्मणिलोकंप्रेरयति। क्यपोरु
ट्। मृषोपपदाद्वदेः कर्मणिनित्यंक्यप्। मृषोद्यं। विशेष्यनिघ्नोयं। उद्रायसौदर्यगुणामृषोद्याः। रोचतेरुच्यः। उपरादेः
कत्वंचसंज्ञायां। सुवर्णरजतभिन्नंधनंकुप्यं। कृष्टेस्वयमेवपच्यंतेकृष्टपच्याः। कर्मकर्तरि। शुद्धेतुकर्मणिकृष्टपाक्याः।
स्ते नव्यथतेऽव्यथ्यः॥ भिद्योध्योनदे। भिदेरुज्झेश्चक्यप्। उज्झेर्धत्वंचनिपात्यते। भिनत्तिकुलंभिद्यः। उज्झत्युदकमित्युध्याः
नदेकिं। भेत्ता। उज्झिता। पुष्यसिध्यौनक्षत्रे। अधिकरणेक्यप्निपात्यते। पुष्यंत्यस्मिन्नर्थाः पुष्यः। सिध्यंत्यस्मिन्नि
तिसिध्यः। विपूयविनीयजित्यामुंजकल्कहलिषु। पूञ्णीञ्जिभ्यः क्यप्। विपूयोमुंजः। रज्ज्वादिकरणायशोधयित
व्यइत्यर्थः। विनीयः कल्कः। पिष्टौषधइत्यर्थः। पापमितिवा। जित्योहलिः। बलेनकृष्टव्यइत्यर्थः। कृष्टसमीक
रणार्थंस्थूलकाष्ठं। अन्यत्तुविपव्यं। विनेयं। जेयंच। प्रत्यपिभ्यांग्रहेः॥ छंदसीतिवक्तव्यं। प्रतिगृह्यं। अपिगृह्यं।

लोकेतुप्रतिग्राह्यं। अपिग्राह्यं। पदास्वैरिबाह्यापक्ष्येषुच। अवगृह्यं। प्रगृह्यंपदं। अस्वैरीपरतंत्रः। गृह्यकाः शुकाः।
पंजरादिबंधनेनपरतंत्रीकृताइत्यर्थः। बाह्यायां। ग्रामगृह्यासेना। ग्रामबहिर्भूताइत्यर्थः। स्त्रीनिर्देशात्पुंनपुंसकयोर्न।
पक्षेभवः पक्ष्यः। दिगादित्वाद्यत्। आर्यैर्गृह्यतेआर्यगृह्यः। तत्पक्षाश्रितइत्यर्थः॥ विभाषाकृवृषोः। क्यप्स्यात्। कृत्यं। कृ
ष्यं। पक्षेऋहलोर्ण्यत्। ऋवर्णांतात्हलंताच्चधातोर्ण्यत्स्यात्। कार्यं। वार्ष्यं। युग्यंचपत्रे। पत्रंवाहनं। युग्योगौः। अत्र
क्यप्कुत्वंचनिपात्यते। अमावस्यदन्यतरस्यां॥ अमोपपदाद्वसेरधिकरणेण्यत्। वृद्धौसत्यांपाक्षिकोह्रस्वश्चनिपा
त्यते। अमासहवसतोस्यांचंद्रार्कौअमावास्या। अमावस्या। ऋहलोर्ण्यत्। चजोरितिकुत्वं। पाक्यं। पाणौसृजेर्ण्यद्वा
च्यः। ऋदुपधलक्षणस्यक्यपोपवादः। पाणिभ्यांसृज्यतेपाणिसर्ग्यारज्जुः। समवच्चपूर्वा। समवसर्ग्या। नकादेः॥ कादेर्धा
तोश्चजोः कुत्वंन। गर्ज्यं। वार्त्तिककारस्तुचजोरितिसूत्रेनिष्ठायामनिटइतिपूरयित्वानकादेरित्यादिप्रत्याचख्यौ। तेन
अर्जितर्जिप्रभृतीनांनकुत्वंनिष्ठायांसेट्कत्वात्। युचुग्लुचुप्रभृतीनांतुकादित्वेपिकुत्वंस्यादेव। सूत्रमतेतुयद्यपिवि
परीतंप्राप्तंतथापियथोत्तरंमुनीनांप्रामाण्यं। अजिव्रज्योश्च। नकुत्वं। समाजः। परिव्राजः। भुजन्युब्जौपाण्युपता

पयोः॥एतयोरेतौनिपात्यौ॥भुज्यतेनेनेतिभुजःपाणिः॥हलश्चेतिघञ्।न्युब्जोस्मिन्नितिन्युब्जः।उपतापोरोगः॥पाण्युपताप
योःकिं।भोगःसमुद्गः॥प्रयाजानुयाजौयज्ञांगे।पंचप्रयाजाः।त्रयोनुयाजाः।यज्ञांगेकिं।प्रयागः।अनुयागः॥वंचेर्गतौ॥नकु
तं।वंच्यं।गतौकिं।वंक्यं।काष्ठं।कुटिलीकृतमित्यर्थः॥ओकउचःके।उचेर्गुणकुत्वंनिपात्यतेकेपरे।ओकःशकुंतवृषलौ।
इगुपधलक्षणःकः।घञासिद्धेरतोह्यान्तार्थमिदं।ण्यआवश्यके॥कुत्वं।अवश्यपाच्यं।यजयाचरुचप्रवचर्चश्च।ण्येकु
त्वं।याज्यं।याच्यं।रोच्यं।प्रवाच्यंग्रंथविशेषः।ऋच।अर्च्यं।ऋदुपधत्वेपिअतएवज्ञापकाण्ण्यत्॥त्यजेश्च।त्याज्यं।त्य
जिपूजोश्चेतिकाशिका।तत्रपूजेर्ग्रहणंचिंत्यं।भाष्यानुक्तत्वात्।ण्यत्प्रकरणेत्यजेरुपसंख्यानमितिभाष्यं।वचोशब्दसं
ज्ञायां॥वाच्यं।शब्दाख्यायांतुवाक्यं॥प्रयोज्यनियोज्यौशक्यार्थे॥प्रयोक्तुंशक्यःप्रयोज्यः।नियोज्योभृत्यः।भोज्यंभक्ष्ये॥
भोग्यमन्यत्।ण्यत्प्रकरणेलपिदभिभ्यांचेतिवक्तव्यं।लाप्यं।दभिर्धातुपाठेपठितोपिवार्त्तिकबलात्स्वीकार्यः।दाभ्यः।आ
शवश्यके॥उवर्णांताद्धातोर्ण्यत्स्यात्।अवश्यंभावेद्योत्ये।लाव्यं।पाव्यं॥आसुयुवपिरपिलपित्रपिचमश्च।षुञ्।आ
साव्यं।युमिश्रणे।याव्यं।वाप्यं।राप्यं।लाप्यं।त्राप्यं।आचाम्यं।आनाय्योनित्ये।आङ्पूर्वान्नयतेर्ण्यदायादेशश्चनिपा

त्यते।दक्षिणाग्निविशेषएवेदं।सदिगार्हपत्यादानीयतेनित्यश्चसततमप्रज्वलनात्।आनेयोन्यःघटादिः।वैश्यकुलादेरानी
तोदक्षिणाग्निश्च।प्रणाय्योसंमतौ॥संमतिःप्रीतिर्विषयीभवनंकर्मव्यापारः।तथाभौंबादरोपिसंमतिः॥तदितरत्रप्रणाय्य
इतिनिपात्यते।प्रणाय्यश्चौरः।प्रीत्यनर्हइत्यर्थः।प्रणाय्योंतेवासी।विरक्तइत्यर्थः।प्रणेयोन्यः॥पाय्यसान्नाय्यनिकाय्यधाय्या
मानहविर्निवाससामिधेनीषु॥मीयतेनेनेतिपाय्यंमानं।ण्यत्।धात्वादेःपत्वंच।आतोयुगितियुक्।सम्यङ्नीयतेहोमा
र्थमग्निंप्रतीतिसान्नाय्यंहविर्विशेषः।ण्यदायादेशः।समोदीर्घश्चनिपात्यते।चीयतेस्मिन्धान्यादिकंनिकाय्योनिवासः।
अधिकरणेण्यत्।आयधात्वादेःकत्वंचनिपात्यते।धीयतेऽनयासमिधितिधाय्याऋक्।क्रतौकुंडपाय्यसंचाय्यौ॥कुंडेनपी
यतेस्मिन्सोमःकुंडपाय्यः।क्रतुः।संचीयतेसौसंचाय्यः।अग्नौपरिचाय्योपचाय्यसमूह्याः॥अग्निधारणार्थस्थ
लविशेषेष्वेतेसाधवः॥अन्यत्रपरिचेयं।उपचेयं।संवाह्यं।चित्याग्निचित्येच॥चीयतेसौचित्योग्निः।अग्नेश्चयनमग्निचि
त्या।प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च॥त्वयागंतव्यं।गमनीयं।गम्यं।लोटाबाधामाभूदितिपुनःकृत्यविधिः।स्त्र्यधि
काराद्धूर्ध्ववासरूपविधिःक्वचिन्नेतिज्ञापयति।तेनक्तल्युट्तुमुन्खलर्थेषुनेतिसिद्धं॥अर्हेकृत्यतृचश्च॥स्तोतुमर्हस्तुत्यः।
स्तोतिकर्मस्तोतास्तुतिकर्त्ता।लिङाबाधामाभूदितिकृत्यतृचौविधिः॥भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्यावा॥

सि॰ कौ॰

॥५॥

एतेकृत्यांताःकर्तरिवानिपात्यंते।पक्षेतयोरेवेतिसकर्मकात्।कर्मणि।अकर्मकात्तुभावेज्ञेयाः।भवतीतिभव्यः।भव्यम
नेनवा।गायतीतिगेयः।साम्नांमयंगेयं।सामानेनवाइत्यादि।शकिलिङ्च॥चात्कृत्याः।वोढुंशक्योवोढव्यः।वहनीयोवा
ह्यः।लिङ्बाधामाभूदितिकृत्योक्तिः।लाघवादनेनैवज्ञापनसंभवेनैवप्रैषादिसूत्रेकृत्याश्चेतिस्कृत्यजं।अर्हेकृत्यतृचोग्र
हणंच॥ ॥इतिकृत्यप्रक्रिया॥ ॥ण्वुल्तृचौ॥धातोरेतौस्तः॥कर्तरिकृदितिकर्त्रर्थे।युवोरनाकौ॥कारकः।कर्त्ता।वोढुम
कुटिता५ र्होवोढा।कारिका।कर्त्री।गाङ्कुटेतिङित्वं।अञ्णिदित्यक्तेर्नङित्वं।कोटकः।विजइट्।विजिता।हनस्तोचिण्णलोः।घात
कः।आतोयुक्।दायकः।नोदात्तोपदेशस्येतिनवृद्धिः।अनिटस्तुनियामकः।जनिवध्योश्च।जनकः।वधहिंसायां।बधकः। शमकोरम कः५
रधिजभोरचि।रंधकः।जंभकः।नेट्यलिटिरधेः॥रधिता।रद्धा।मस्जिनशोरितिनुम्।मंक्ता।नंष्टा।नशिता।रभेरश
ब्लिटोः।रंभकः।रब्धा।लभेश्च।लंभकः।लब्धा।तीषसह।एषिता।एष्टा।सहिता।सोढा।दरिद्रातेरालोपः।दरिद्रिता।
ण्वुलिन।दरिद्रायकः।कृत्यल्युट्इत्येवसूत्रमस्तु।यत्रविहितास्ततोन्यत्रापिस्युरित्यर्थात्।एवंचबहुलग्रहणयोग
विभागेनकृन्मात्रस्यअर्थव्यभिचारार्था।पादाभ्यांह्रीयतेपादहारकः।कर्मणिण्वुल्।क्रमेःकर्तर्यात्मनेपदविषयात्
कृतइण्निषेधोवाच्यः।प्रक्रंता।कर्तरीतिकिं।प्रक्रमितव्यं।आत्मनेपदेतिकिं।संक्रमिता।अनन्यभावेविषयशब्द

स्तेनानुपसर्गाद्वेतिविकल्पार्हस्यननिषेधः॥क्रमिता।तदर्हत्वमेवतद्विषयत्वं।तेनक्रंतेरप्यपिकेचित्।गमेरिडित्यत्रपरस्मैपद
ग्रहणंतङानयोरभावंलक्षयति।संजिगमिषिता।एवंनशब्दश्चतुर्थ्यः।विवत्सिता।यङंताण्वुल्।अल्लोपस्यस्थानिवत्वा
न्नवृद्धिः।पापचकः।यङंतात्तुपापाचकः।नंदिग्रहिपचादिभ्योल्युणिन्यचः॥नंद्यादेर्ल्युः।ग्रह्यादेर्णिनिः।पचादेरच्।स्या
त्।नंदयतीतिनंदनः।जनमर्दयतीतिजनार्दनः।मधुसूदनः।विशेषेणभीषयतीतिविभीषणः।लवणः।नंद्यादिगणेनि
पातनाण्णत्वं।ग्राही।स्थायी।मंत्री।विशायी।वृद्ध्यभावोनिपातनात्॥विषयी।इरुषत्वमपि।परिभावी।इरुपाक्षिकोवृद्ध्यभावो ५परिभवी
निपात्यते।पचादिराकृतिगणः।शिवशमरिष्टस्यकरे॥कर्मणिघठाठच्।इतिसूत्रयोःकरोतेर्घटेश्च।अच्।प्रयो
गात्।अच्प्रत्ययेपरेयङ्लुकविधानाच्च।केषांचित्पाठस्तुअनुबंधासंजनार्थः।केषांचित्प्रपंचार्थः।केषांचिद्बाधकबाध
नार्थः।पचतीतिपचः।नदट्।चोरट्।देवट्।इत्यादयष्टितः।नदी।चोरी।देवी।दीव्यतेरिगुपधेतिकःप्राप्तः।जारभरा।श्वपचा।
अनयोःकर्मण्यण्प्राप्तः।न्यंक्वादिषुपाठात्श्वपाकोपि।यङोचिचेतिलुक्।नधातुलोपइतिगुणवृद्धिनिषेधः।चेक्रियः।नेन्यः।
लोलुवः।पोपुवः।मरीमृजः।चरिचलिपतिवदीनांवाद्वित्वमाक्चाभ्यासस्येतिवक्तव्यं।आगमस्यदीर्घत्वसामर्थ्यादभ्यासस्य

सि॰ कौ॰
॥ ६ ॥

ह्रस्वो हलादिः शेषश्च न। चराचरः। चलाचलः। पतापतः। वदावदः। हंतेर्घत्वं च। घत्वमभ्यासस्य उत्तरस्य तु अभ्यासाच्चेति कु
त्वं। घनाघनः। पाटेर्णिलुक्चोक् च दीर्घश्चाभ्यासस्य। पाटूपटः। पक्षे चरः चलः पतः वदः हनः पटः। रात्रेः कृतीति वा मुम्। रात्रिं
चरो रात्रिचरः। इगुपधज्ञाप्रीकिरः कः॥ एभ्यः कः स्यात्। क्षिपः। लिखः। बुधः। कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति कि
रः। वासरूपविधिना ण्वुल्तृचावपि। क्षेपकः। क्षेप्ता। आतश्चोपसर्गे॥ कः स्यात्। श्याद्व्यधेति णस्यापवादः। सुग्लः। प्रज्ञः।
पाघ्राध्माधेट्दृशः शः॥ पिबः। जिघ्रः। धमः। धयः। धयाकन्या। धेटष्टित्वात्स्तनंधयीति खशीव ङीप् प्राप्तः। खशोऽन्यत्र
नेष्यत इति हरदत्तः। पश्यतीति पश्यः। घ्रः संज्ञायां न। व्याघ्रादिभिरिति निर्देशात्। अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजि पार
चेतिसातिसाहिभ्यश्च॥ शः स्यात्। लिंपः। विंदः। हेतुमति चेति णिच्। धारयः। पारयः। वेदयः। उदेजयः। चेतयः। सातिः सु
खार्थः। सौत्रो हेतुमण्ण्यंतः। सातयः। वासरूपन्यायेन क्विप् सात्। परमात्मा। सात्वंतो भक्ताः। षह मर्षणे चुरादिः हेतुमण्ण्यं
तो वा। साहयः। अनुपसर्गात् किं। प्रलिपः। नौ लिंपेर्वाच्यः। निलिंपाः। गवादिषु विंदेः संज्ञायां। गोविंदः। अरविंदं। ददाति द
धात्योर्विभाषा॥ शः स्यात्। ददः। दधः। पक्षे वक्ष्यमाणो णः। अनुपसर्गादित्येव। प्रदः। प्रधः। ज्वलितिकसंतेभ्यो णः॥

इतिशब्द आद्यर्थः। ज्वलादिभ्यः कसंतेभ्यो णः स्याद्वा। पक्षेऽच्। ज्वालः। ज्वलः। चालः। चलः। अनुपसर्गादित्येव। उज्वलः। तने
रुपसंख्यानं। इहानुपसर्गादिति विभाषेति च न संबध्यते। अवतनोतीत्यवतानः। श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लि
षश्वसश्च॥ श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात्। श्येङो वसातेश्चादंतत्वात्सिद्धे पृथग्ग्रहणं उपसर्गे कं बाधितुं। आतो युगि
ति युक्। अवश्यायः। प्रतिश्यायः। आत्त दायः। धायः। व्यध ताडने दिवादिः व्याधः। स्रु गतौ। आङ्पूर्वः संपूर्वश्च। आस्रा
वः। संस्रावः। अत्यायः। अवसायः। अवहारः। लेहः। श्लेषः। श्वासः। दुन्योरनुपसर्गे॥ णः स्यात्। दुनोतीति दावः। नीसाहच
र्यात्सानुबंधकात् दुनोतेरेव णः। दवतेस्तु पचाद्यच्। दवः। नयतीति नायः। उपसर्गे तु प्रदवः। प्रणयः। विभाषाग्रहः॥ णो वा
पक्षेऽच्। व्यवस्थितविभाषेयं। तेन जलचरे ग्राहः। ज्योतिषि ग्रहः। भवतेश्चेतिका। भवो देवः संसारश्च। भावाः पदार्थाः। भा काशि
ष्यमते तु भाव्यर्थाच्चुरादिर्ण्यंतादच्। भावः। गेहे कः॥ गेहे कर्त्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहं। तात्स्थ्या
द्गृहाः दाराः। शिल्पिनि ष्वुन्॥ क्रियाकौशलं शिल्पं तद्वति कर्त्तरि ष्वुन् स्यात्। नृतिखनिरंजिभ्य एव। नर्त्तकः। नर्त्तकी।
खनकः। खनकी। असिअके नेरंजेर्नलोपो वाच्यः। रजकः। रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्। रंजेस्तु क्वुन्।

शिल्पिसंज्ञयोरितिक्वुन्। टाप्। रजका। पुंयोगेतुरजकी। गस्थकन्॥ गायतेस्थकन्स्यात्शिल्पिनिकर्त्तरि। गाथकः। ण्युट्च॥
गायनः। टित्वाङ्गायनी॥ हश्चव्रीहिकालयोः॥ हाकोहाङश्चण्युट्स्याद्व्रीहौकालेचकर्त्तरि। जहात्युदकमितिहायनोव्रीहिः।
जहातिभावानितिहायनोवर्षं। जिहीतेप्राप्नोतिवा॥ प्रुसृल्वःसमभिहारेवुन्॥ समभिहारग्रहणेनसाधुकारित्वंलक्ष्यते। प्रव
कः। सरकः। लवकः। आशिषिच॥ आशीर्विषयार्थवृत्तेर्धातोर्वुन्स्यात्कर्त्तरि। जीवतात्जीवकः। नंदतात्नंदकः। आशीः
प्रयोक्तृधर्मः। आशास्तितुःपित्रादेरियमुक्तिः॥ कर्मण्यण्॥ कर्मणिउपपदेधातोरण्प्रत्ययःस्यात्। उपपदसमासः। कुंभं
करोतीतिकुंभकारः। आदित्यंपश्यतीत्यादावनभिधानान्न। शीलिकामिभक्ष्याचरिभ्योणः। अणोपवादार्थंवार्त्तिकं। मांस
शीलामांसकामा। मांसभक्षा। कल्याणाचारा। ईक्षिक्षमिभ्यांच। सुखप्रतीक्षा। बहुक्षमा। कथंतर्हिगंगाधरभूधरादयः।
कर्मणःशेषत्वविवक्षायांभविष्यंति। ह्वावामश्च॥ अण्स्यात्। कापवादः। स्वर्गह्वायः। तंतुवायः। धान्यमायः। आतोनुप
सर्गेकः॥ आदंताद्धातोरनुपसर्गात्कर्मण्युपपदेकःस्यान्नाण्। आतोलोपः। गोदः। पार्ष्णित्रम्। अनुपसर्गेकिं। गोसंदायः।
कविधौसर्वत्रप्रसारिणिभ्योडः॥ ब्रह्मजिनातीतिब्रह्मज्यः। सर्वत्रग्रहणात्आह्वः। प्रह्वः। सुपिस्थः॥ सुपीतियोगोविभ

ज्यते। सुपिउपपदेआदंतात्कःस्यात्। द्वाभ्यांपिबतीतिद्विपः। समस्थः। विषमस्थः। ततस्थः। सुपिस्थतिष्ठतेःकःस्यात्॥ आ
रंभसामर्थ्यात्भावे। आखुनांउत्थानंआखूत्थः॥ प्रष्ठोग्रगामिनि॥ प्रतिष्ठतइतिप्रष्ठोगौः। अग्रतोगच्छतीत्यर्थः। अ
ग्रेतिकिं। प्रस्थः। अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यस्थः॥ स्थइतिकप्रत्ययां
तस्यानुकरणं। षष्ठ्यर्थेप्रथमा। एभ्यस्थस्यसस्यषःस्यात्। द्विष्ठः। त्रिष्ठः। इतऊर्ध्वंकर्मणिसुपीतिद्वयमप्यनुवर्त्त
ते। तत्राकर्मकेषुसुपीत्यस्यसंबंधः। तुंदशोकयोःपरिमृजापनुदोः॥ तुंदशोकयोःकर्मणोरुपपदयोःआभ्यांकःस्या
त्। आलस्यसुखाहरणयोरितिवक्तव्यं। तुंदंपरिमार्ष्टीतितुंदपरिमृजोलसः। शोकापनुदः। सुखस्याहर्त्ता। आलसा
दन्यत्रतुंदपरिमार्जएव। यस्त्वसंसारासारत्वोपदेशेनशोकमपनुदतिसशोकापनोदः। कप्रकरणेमूलविभुजादिभ्य
उपसंख्यानं। मूलानिविभुजतिमूलविभुजोरथः। आकृतिगणोयं। महीध्रः। कुध्रः। बिलतीतिगिलः। प्रेदाज्ञः॥ दा
रूपाज्जानातेश्चप्रोपसृष्टात्कर्मण्युपपदेकःस्यादणोपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्गइत्युक्तेःप्रादन्यस्मिं
स्तिनकः। गोसंप्रदायः। समिख्यः। गोसंख्यः। गापोष्टक्॥ अनुपसृष्टाभ्यामाभ्यांटक्स्यात्। कर्मण्युपपदे। साम

गः। सामगी। उपसर्गेत्तुसामसंगायः। पिबतेः सुराशीध्वोरितिवाच्यं॥ सुरापी। शीधुपी। अन्यत्रक्षीरपाब्राह्मणी। सुरांपाति
रक्षतीतिसुरापा। हरतेरनुद्यमनेच्॥ अंशहरः। अनुद्यमनेकिं। भारहारः। शक्तिलांगलांकुशतोमरयष्टिघटघटीधनुष्षुग्र
हेरुपसंख्यानं॥ शक्तिग्रहः। लांगलग्रहः। सूत्रेचधार्यर्थे। सूत्रग्रहः। यस्तुसूत्रंकेवलमुपादत्तेनतुधारयति। तत्राणेव। सूत्र
ग्राहः। वयसिच। उद्यमनार्थंसूत्रं। कवचहरः कुमारः। आङिताच्छील्ये॥ पुष्पाण्याहरतितच्छीलः पुष्पाहरः। ताच्छील्येकिं।
भाराहारः। अर्हः। अर्हतेरच्स्यात्कर्मण्युपपदेण्णोपवादः। पूजार्हाब्राह्मणी। स्तंबकर्णयोरमिजपोः। हस्तिसूचकयोरि
तिवक्तव्यं। स्तंबेरमतेस्तंबेरमोहस्ती। तत्पुरुषेकृतीतिहलदंतादितिवाऽलुक्। कर्णेजपः सूचकः। शमिधातोःसंज्ञायां॥
शंभवः। शंवदः। पुनर्धातुग्रहणंबाधकविषयेपिप्रवृत्त्यर्थं। कृञोहेत्वादिषुटोमाभूत्। शंकरानामपरिव्राजिका। तच्छीला।
अधिकरणेशेतेः॥ खेशेतेरखशयः। पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यांशेतेपार्श्वशयः। पृष्ठशयः। उदरेणशेतेउदरशयः। उत्ता
नादिषुकर्त्तृषु। उत्तानः शेतेउत्तानशयः। अवमूर्धशयः अवनतोमूर्धायस्यसअवमूर्धा। अधोमुखः शेतेइत्यर्थः॥ गिरौ
डश्छंदसि। गिरौशेतेगिरिशः। कथंतर्हिगिरिशमुपचचारप्रत्यहंसासुकेशीति। गिरिशास्यास्तीतिविग्रहेलोमादित्वात्शः॥

चरेष्टः॥ अधिकरणेउपपदे। कुरुचरः। कुरुचरी। भिक्षासेनादायेषुच॥ भिक्षांचरतीतिभिक्षाचरः। सेनाचरः। आदायेतिल्यबंतं। आ
दायचरः। कथंप्रेक्ष्यास्थितांसहचरीमिति। पचादिषुचरडितिपाठात्। पुरोग्रतोग्रेषुसर्त्तेः॥ पुरःसरः। अग्रतःसरः। अग्रमग्रेणाग्रेवा
सरतीतिअग्रेसरः। सूत्रेअग्रेइत्येदंतत्वमपिनिपात्यते। कथंतर्हियूथंतदग्रसरगर्विततदग्रसारमिति। बाकुलकादितिह
रदत्तः। पूर्वेकर्त्तरि॥ कर्तृवाचिनिपूर्वशब्देउपपदेसर्त्तेष्टःस्यात्। पूर्वःसरतीतिपूर्वसरः। कर्त्तरिकिं। पूर्वंदेशंसरतीतिपूर्वसा
रः। कृञोहेतुताच्छील्यानुलोम्येषु॥ एषुद्योत्येषुकरोतेष्टःस्यात्॥ अतःकृकमीतिसः। यशस्करीविद्या। श्राद्धकरः। वचनकरः।
दिवाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुर
रुष्षु॥ एषुकृञष्टःस्यात्। हेत्वादावपि। दिवाकरः। निशाकरः। प्रभाकरः। कस्कादित्वात्सः। भास्करः। बहुकरः। बहुशब्दस्य
वैपुल्यार्थेसंख्यापेक्षयापृथग्ग्रहणं। लिपिलिबिशब्दौपर्यायौ। संख्या। एककरः। द्विकरः। कस्कादित्वादहस्करः। नित्यंस
मासेनुत्तरपदस्थस्येतिषत्वं। धनुष्करः। अरुष्करः। किंयत्तद्बहुषुकृञोज्विधानमितिवार्त्तिकं। किंकरा। यत्करा। हेत्वादौ
टबाधिपरत्वादच्। पुंयोगेङीष्। किंकरी। कर्मणिभृतौ॥ कर्मशब्देउपपदेकरोतेष्टःस्यात्। कर्मकरोभृतकः। कर्मकारोन्यः॥

नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु॥ एषु कृञः टो न। हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकार इत्यादि॥ स्तंबशकृतो
रिन्॥ व्रीहिवत्सयोरिति वक्तव्यं॥ स्तंबकरिर्व्रीहिः। शकृत्करिर्वत्सः। व्रीहिवत्सयोः किं। स्तंबकारः। शकृत्कारः। हरतेर्दृति
नाथयोः पशौ॥ दृतिनाथयोरुपपदयोः ह्रञ इन् स्यात् पशौ कर्तरि॥ दृतिं हरतीति दृतिहरिः। नाथं नासारज्जुं हरतीति ना
थहरिः। पशौ किं। दृतिहारः। नाथहारः। फलेग्रहिरात्मंभरिश्च॥ फलानि गृह्णातीति फलेग्रहिः। उपपदस्य एदंतत्वं ग्रहेरिन्
प्रत्ययश्च निपात्यते। आत्मानं बिभर्तीति आत्मंभरिः। आत्मनो मुमागमः। भृञ इन् च। चात् कुक्षिंभरिः। चांद्रास्तु आत्मोद
रकुक्षिष्विति पेठुः। ज्योत्स्नाकरंभमुदरंभरयश्चकोरा इति मुरारिः। एजेः खश्॥ ण्यंतादेजेः खश् स्यात्। अरुर्द्विषदजंतस्य
मुम्॥ अरुषो द्विषतो जंतस्य च मुमागमः स्यात्। खिदंते उत्तरपदे न त्वव्ययस्य। शित्वाच्छबादि। जनं एजयतीति जनमे
जयः। वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः खश् उपसंख्यानं। वातमजा मृगाः। खित्यनव्ययस्य॥ खिदंते उत्तर
पदे पूर्वपदस्य ह्रस्वः स्यात्॥ ततो मुम्। शुनिंधयः। तिलंतुदः। शर्द्धंजहा माषाः। शर्द्धोऽपानशब्दः तं जहातीति विग्रहः।
जहातिरंतर्भावितण्यर्थः। नासिकास्तनयोर्ध्माधेटोः॥ अत्र वार्त्तिकं। स्तने धेट इति वक्तव्यं। नासिकायां ध्मश्चेति वक्तव्यं॥

स्तनंधयतीति ~~स्तनंधयतीति~~ स्तनंधयः। धेटष्टित्वात् स्तनंधयी। नासिकंधमः। नासिकंधयः। नाडीमुष्ट्यो
श्च॥ एतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात्। यथासंख्यं नेष्यते। नाडिंधयः। नाडिंधमः। मुष्टिंधयः। मुष्टिंधमः।
घटीखारीखरीषूपसंख्यानं। घटिंधमः। घटिंधय इत्यादि। खारी परिमाणं। खरी गर्धभी। उदि कूले रुजिवहोः। उत्पू
र्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात्। कूलं उद्रुजतीति कूलमुद्रुजः। कूलमुद्वहः। वहाभ्रे लिहः। वहस्कं
धः। तं लेढीति वहंलिहो गौः। अदादित्वाच्छपो लुक्। खशोऽङित्वान्न गुणः। अभ्रंलिहो वायुः। परिमाणे पचः॥ प्रस्थंप
चा स्थाली। खारिंपचः कटाहः। मितनखे च॥ मितंपचा ब्राह्मणी। नखंपचा यवागूः। पचिरत्र तापवाची। विध्वरुषोस्तु
दः॥ विधुंतुदः। मुमि कृते संयोगांतस्य लोपः। अरुंतुदः। असूर्यललाटयोर्दृशितपोः॥ असूर्यमित्यसमर्थसमासः। दृशिना
नञ्संबंधात्। सूर्यं न पश्यतीत्यसूर्यंपश्या राजदाराः। ललाटंतपः सूर्यः। उग्रंपश्येरंमदपाणिंधमाश्च॥ एते निपात्यंते। उ
ग्रमिति क्रियाविशेषणं। तस्मिन्नुपपदे दृशेः खश्। उग्रंपश्यतीत्युग्रंपश्यः। इरा उदकं तेन माद्यति दीप्यते अबिंधनत्वादिती
रंमदो मेघज्योतिः। इह निपातनात् श्यन्। पाणयो ध्मायंते अस्मिन्निति पाणिंधमोऽध्वा। अंधकाराद्यावृत इत्यर्थः॥

सि०कौ

११०॥ तत्रहिसर्पाद्यपनोदनायपाणयःशब्द्यंते॥प्रियवशेवदःखच्॥प्रियंवदः।वशंवदः।गमेःसुपिवाच्यः।असंज्ञार्थमिदं।मितंग
मोहस्ती।विहायसोविहचइतिवाच्यं।खच्चडिद्वाच्यः।विहंगः।विहंगमः।भुजंगः।भुजंगमः।द्विषत्परयोस्तापेः॥खच्स्या
त।खचिह्रस्वः॥खचिपरेणावुपधायाह्रस्वःस्यात॥द्विषंतंपरंवातापयतीतिद्विषंतपः।परंतपः।घटघटीग्रहणाल्लिंगवि
शिष्टपरिभाषाअनित्या।तेनेहन।द्विषतींतापयतीतिद्विषतीतापः।वाचियमोव्रते॥वाक्शब्देउपपदेयमेःखच्स्यात।
व्रतेगम्ये।वाचंयमपुरंदरौच॥वाक्पुरोरमंतत्वंनिपात्यते।वाचंयमोमौनव्रती।व्रतेकिं।अशक्त्यादिनावाचंयच्छतीति
वाग्यामः।पूःसर्वयोर्दारिसहोः॥पुरंदारयतीतिपुरंदरः।सर्वंसहः।सहिग्रहणमसंज्ञार्थं।भगेचदारेरितिकाशिका।
बाऊलकेनलब्धमिदमित्याऊः।भगंदारयतीतिभगंदरः।सर्वकूलाभ्रकरीषेषुकषः॥सर्वंकषःखलः।कूलंकषान
दी।अभ्रंकषोवायुः।करीषंकषावात्या।मेघर्तिभयेषुकृञः।मेघंकरः।ऋतिंकरः।भयंकरः।भयशब्देनतदंतविधिः।
अभयंकरः।क्षेमप्रियमद्रेणच।एषुकृञोण्स्यात्चात्खच्।क्षेमंकरः।क्षेमकारः।प्रियंकरः।प्रियकारः।[illegible]मद्रं
करोमद्रकारः।वेतिवाच्येण्ग्रहणंहेत्वादिषुटोमाभूदिति।कथंतर्हिअल्पारंभाःक्षेमकराइति।कर्मणःशेषत्ववि

वक्षायांपचाद्यच्।आशितेभुवःकरणभावयोः।आशितशब्देउपपदेभवतेःखच्।आशितोभवत्यनेनाशितंभवःओदनः।
आशितस्यभवनंआशितंभवः।संज्ञायांभृतृवृजिधारिसहितपिदमः॥विश्वंबिभर्तीतिविश्वंभरः।विश्वंभरा।रथंत
रंसाम।इहरथेनतरतीतिव्युत्पत्तिमात्रंनत्ववयवार्थानुगमः।पतिंवराकन्या।शत्रुंजयोहस्ती।युगंधरःपर्वतः।शत्रु
दूरपार सहः।शत्रुंतपः।अरिंदमः।दमिःशमनायांतेनसकर्मकइत्युक्तं।मतांतरेतुअंतर्भावितण्यर्थोत्रदमिः।गमश्च॥सुतंग
मः।अंतात्यंताध्वैसर्वानंतेषुडः॥संज्ञायामितिनिवृत्तं।एषुगमेर्डःस्यात्।डित्वसामर्थ्यादभस्यापिटेर्लोपः।अंतंगच्छ
तीत्यंतगइत्यादि।सर्वत्रपन्नयोरुपसंख्यानं।पन्नंपतितंगच्छतीतिपन्नगः।पन्नमितिपद्यतेःक्तांतंक्रियाविशेषणं।उर
सोलोपश्च।उरसागच्छतीत्युरगः।सुदुरोरधिकरणे।सुखेनगच्छतीत्यत्रसुगः।दुर्गः।अन्यत्रापिदृश्यतइतिवक्तव्यं।
ग्रामगः।डेचविहायसोविहादेशोवक्तव्यः।विहगः।आशिषिहनः॥शत्रुंवध्यात्शत्रुहः।आशिषिकिं।शत्रुघातः।दारा
वाहनोणंतस्यचटःसंज्ञायां।दारुशब्देउपपदेआङ्पूर्वात्हंतेरण्स्यात्टकारश्चांतादेशोवक्तव्यइत्यर्थः।दार्वा
घाटः।चारोवा।चार्वाघाटः।चार्वाघातः।कर्मणिसमिच।कर्मण्युपपदेसंपूर्वाद्धंतेरुक्तंवेत्यर्थः।वर्णान्संहतीतिवर्णसं

घातः। वर्णसंघातः। पदसंघातः। पदसंघातः॥ अपे क्लेशतमसोः॥ अपपूर्वाद्धंतेर्डः स्यात्। अनाशीरर्थमिदं। क्लेशापहः
पुत्रः। तमोपहः सूर्यः। कुमारशीर्षयोर्णिनिः॥ कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती। लक्षणे जायापत्यो
ष्टक्॥ हंतेष्टक् स्यात् लक्षणवति कर्त्तरि। जायाघ्नो ना। पतिघ्नी स्त्री। अमनुष्यकर्तृके च॥ जायाघ्नस्तिलकालकः। पतिघ्नी
पाणिरेखा। पित्तघ्नं घृतं। अमनुष्येति किं। आखुघातः शूद्रः। अथ कथं बलभद्रः प्रलंबघ्नः कृतघ्नः शत्रुघ्न इत्यादि। मू
लविभुजादित्वात् सिद्धं। चोरघातो नगरघातो हस्तीति तु बाहुलकात्। शक्तौ हस्तिकपाटयोः॥ हंतेष्टक् स्यात् शक्तौ
द्योत्यायां। अमनुष्यकर्तृकार्थमिदं। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठांतरं। पाणिघताडघौ शिल्पिनि॥ हंते
ष्टक् टिलोपो घत्वं च निपात्यते। पाणिताडयोरुपपदयोः। शिल्पिनि किं। पाणिघातः। ताडघातः। राजघ उपसंख्यानं। राजा
नं हंति राजघः॥ आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्॥ एषु च्व्यर्थेष्वच्व्यंतेषु कर्मसूपप
देषु कृञः ख्युन् स्यात्। अनाढ्यमाढ्यं कुर्वंत्यनेन आढ्यंकरणं। अच्वौ किं। आढ्यीकुर्वंत्यनेन। इह प्रतिषेधसामर्थ्या
ल्ल्युडपि नेति काशिका। भाष्यमते तु ल्युट् स्यादेव। अच्व्येवेति स्फुटतरार्थं। कर्त्तरि भुवः खिष्णुच्खुकञौ॥ आढ्यादिषु च्व्य

र्थेष्वच्व्यंतेषु भवतेरेतौ स्तः। अनाढ्य आढ्यो भवति आढ्यंभविष्णुः। आढ्यंभावुकः। स्पृशोनुदके क्विन्॥ घृतस्पृक्। क
र्मणीति निवृत्तं। मंत्रेण स्पृशतीति मंत्रस्पृक्। ऋत्विक्दधृक्। व्याख्यातं। त्यदादिषु दृशोनालोचने कञ् च॥ समानान्य
योश्चेति वक्तव्यं॥ सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। क्सोपि वाच्यः। तादृक्षः। सदृक्षः। अन्यादृक्षः। सत्सूद्विषद्रु
हदुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप्। एभ्यः क्विप् स्यात् उपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। उपनि
षत्। अंडसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित् इत्यादि। अग्रग्रामा
भ्यां नयतेर्णो वाच्यः। अग्रणीः। ग्रामणीः। भजो ण्विः॥ सुप्युपपदे चोपसर्गे भजेर्ण्विः स्यात्। अंशभाक्। प्रभाक्। अदोनन्ने॥
आममत्ति आमात्। सस्यात्। अनन्ने किं। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेण सिद्धे वचनमण्बाधनार्थं। क्रव्यात्।
आममांसभक्षकः। कथं तर्हि क्रव्यादोस्रप आशर इति। पक्वमांसशब्दे उपपदे अण्। उपपदस्य क्रव्यादेशः पृषोदरा
दित्वात्। दुहः कप् घश्च॥ कामदुघा। अन्येभ्योपि दृश्यते। छंदसीति निवृत्तं। मनिन्क्वनिप्वनिप्विच्। एते प्रत्यया धातोः
स्युः॥ नेड्वशि कृति॥ वशादेः कृत इण् न स्यात्। शृ सुशर्मा। प्रातरित्वा। विड्वनोरनुनासिकस्यात्॥ अनुनासिक

स्यआत्स्यात्। विजायत इति विजावा। ओण्। अवावा। विच्। रोट्। रेट्। सुगण्। क्विप् च॥ अयमपि दृश्यते॥ सत्सूद्वि
षेति क्विपस्यैव प्रपंचः। उखास्रत्। पर्णध्वत्। वाहभ्रट्। अंतः। पदांतस्यानितेर्नस्य णत्वं स्यात्। उपसर्गस्थान्निमित्ता
त्परस्यैवेत्। हे प्राण्। शासइद्हलीतीत्वं। मित्राणि शास्तीति मित्रशीः। आशासः क्वावुपधाया इत्त्वं वाच्यं। आशीः। इलो
त्वे। गीः। पूः। छ्वोः शूडनुनासिके च। ... इस्मन्त्रन्क्विषु च। एषु छादेर्ह्रस्वः स्यात्। तनुछत्। अनुनासिकस्य क्वीति दीर्घः। मोनो धातोः। प्रतान्। प्रशा
न्। छ्वोरित्यूठ्। अक्षद्यूः। ज्वरत्वरेत्यूठ्। जूः। जूरौ। जूरः। तूः। स्रूः। ऊः। वृद्धिः। जनानवतीति जनौः। जनावौ। जनावः। मूः।
मुवौ। मुवौ। मुवः। स्रुमूः। स्रुम्वौ। स्रुम्वः। मूर्छा। मूः। मुरौ। मुरः। धुर्वी। धूः। गमः क्वौ॥ अनुनासिकलोपः स्यात्। अंगगत्।
गमादीनामिति वक्तव्यं। परीतत्। संयत्। स्रुनत्। ऊङ् च गमादीनामिति वक्तव्यं। लोपश्च। अग्रेगूः। अग्रेभ्रूः। रुहः कचि
चात् क्विप्। शंस्तः। शंस्तौ। शमिधातोरित्यचं बाधितुं सूत्रं। सुप्यजातौ णिनिस्ताच्छील्ये॥ अजात्यर्थे सुपि धातोर्णि
निः स्यात् ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किं। ब्राह्मणानामंत्रयिता। ताच्छील्ये किं। उष्णं भुंक्ते कदाचित्।
इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानमिति वार्त्तिकं पठितं॥

हरदत्तमाधवादिभिश्चैतदेवानुसृतं। एतच्च भाष्यविरोधादुपेक्ष्यं। प्रसिद्धश्चोपसर्गे णिनिः। सत्रभूवोपजीविनां। अनुया
यिवर्गः। पतत्यधो धामविसारि। न वंचनीयाः प्रभवोनुजीविभिरित्यादौ। साधुकारिण्युपसंख्यानं। ब्रह्मणि वदः॥ ताच्छील्या
र्थं वार्त्तिकं। साधुदायी। ब्रह्मवादी। कर्त्तर्युपमाने॥ णिनिः स्यात्। उपपदार्थः कर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानं। उष्ट्र इव क्रो
शतीति उष्ट्रक्रोशी। ध्वांक्षरावी। अताच्छील्यार्थं जात्यर्थं च सूत्रं। कर्त्तरि किं। अपूपानिव भक्षयंति माषान्। उपमाने किं। उष्ट्रः
क्रोशति। व्रते॥ णिनिः स्यात्। स्थंडिलशायी। बहुलमाभीक्ष्ण्ये॥ पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः स्यात्॥ क्षीरपायि
णः उशीनराः। मनः॥ सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी। आत्ममाने खश्च॥ स्वकर्मके मनने वर्त्तमानान्मन्यतेः
सुपि खश्च स्यात्। चात् णिनिः। पंडितमात्मानं मन्यते पंडितंमन्यः। पंडितमानी। खित्यनव्ययस्य। कालिंमन्या। अनव्य
यस्य किं। दिवामन्या॥ इच एकाचोम्प्रत्ययवच्च। इजंतादेकाचोम् स्यात् स च स्वाद्यम्वत् खिदंते परे। श्रोतोम् शसोः।
गांमन्यः। वाम्शसोः। स्त्रियंमन्यः। स्त्रीमन्यः। नरंमन्यः। भुवंमन्यः। श्रियमात्मानं मन्यते श्रियंमन्यं कुलं। भाष्यका
रवचनात् श्रीशब्दस्य ह्रस्वः। मुममोरभावश्च। भूते॥ अधिकारोयं॥ वर्त्तमाने लडिति यावत्। करणे यजः॥ करणेउ

पपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि। सोमेनेष्टवान्सोमयाजी। अग्निष्टोमयाजी। कर्मणि हनः॥ पितृव्यघाती।
कर्मणीत्येतत्सहेति च यावदधिक्रियते॥ ब्रह्मभ्रूणवृत्रेषु क्विप्॥ एषु कर्मसूपपदेषु हन्तेर्भूते क्विप्स्यात्। ब्रह्महा।
भ्रूणहा। वृत्रहा। क्विप् चेत्येव सिद्धे नियमार्थमिदं। ब्रह्मादिष्वेव। भूत एव। हन्तेरेव। क्विबेवेति। चतुर्विधोऽत्र निय
म इति काशिका। ब्रह्मादिष्वेव। क्विबेवेति द्विविधो नियम इति भाष्यं॥ सुकर्मपापमन्त्रपुण्येषु कृञः॥ सुकर्मादिषु
च कृञः क्विप्स्यात्। त्रिविधोऽत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मंत्रकृत्। पुण्यकृत्। क्विबेवेति नि
यमात् कर्म कृतवानित्यत्राण् न। कृञ एवेति नियमात् मंत्रमधीतवान् मंत्राध्यायः। अत्र न क्विप्। भूत एवेति नियमात्
मंत्रं करोति करिष्यति वेति विवक्षायां न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्॥ शास्त्रकृत्। भा
ष्यकृत्। सोमे सुञः॥ सोमसुत्। चतुर्विधोऽत्र नियम इति काशिका। सोम एव। सुञ एव। क्विबेव। भूत एव। एवमु
त्तरसूत्रेऽपि। अग्नौ चेः॥ अग्निचित्। कर्मण्यग्न्याख्यायां॥ कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप्स्या
त्। अग्न्याधारस्थलविशेषस्याख्यायां। श्येन इव चितः श्येनचित्। कर्मणीनिविक्रियः॥ कर्मण्युपपदे विपूर्वा

त्क्रीणातेरिनिः स्यात्। कुत्सितग्रहणं कर्तव्यं। सोमविक्रयी। घृतविक्रयी॥ दृशेः क्वनिप्॥ कर्मणि भूत इत्येव। पारं दृष्टवान् पा
रदृश्वा। राजनि युधिकृञः॥ क्वनिप् स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा। सहे च॥ कर्म
णीति निवृत्तं। सहयुध्वा। सहकृत्वा। सप्तम्यां जनेर्डः॥ सरसिजं। मंदुरायां जातो मंदुरजः। ङ्यापोरिति ह्रस्वः। सप्तम्या
मजातौ॥ जातिशब्दवर्जिते पंचम्यंते उपपदे जनेर्डः स्यात्। संस्कारजः। अदृष्टजः। उपसर्गे च संज्ञायां। प्रजा स्यात्संततौ
जने॥ अनौ कर्मणि॥ अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्॥ पुमांसमनुरुध्य जाता पुमनुजा। अन्येष्वपि दृश्यते॥
अन्येष्वप्युपपदेषु जनेर्डः स्यात्। अजः। द्विजः। ब्राह्मणजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादु
पि कारकांतरेऽपि क्वचित्। परितः खाता परिखा। क्तक्तवतू निष्ठा॥ एतौ निष्ठासंज्ञौ स्तः। निष्ठा। भूतार्थवृत्तेर्धातो
र्निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्तरि कृदिति क्तवतुः॥ उकावित्तौ। स्नातं मया। स्तुतस्त्वया विष्णुः। वि
८.९॥ ष्णुर्विश्वं कृतवान्। निष्ठायामण्यदर्थे॥ ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्। क्षियो दीर्घात्॥
दीर्घात् क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्मणोस्तु। क्षितः कामो मया। अयुकः किति। श्रितः। श्रितवा

[illegible]०५

दृतस्य

न्। भृतः। भृतवान्। कृतः। कृतवान्। ऊर्णोतेर्णुवद्भावो वाच्यः। तेन एकाच्त्वान्नेट्। ऊर्णुतः। नुतः। स्नुतः। रदाभ्यां निष्ठातो
नः पूर्वस्य च दः। रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्। निष्ठापेक्षया धातोर्दकारस्य च। शॄ। शीर्त इति स्थिते इ
रपरत्वं णत्वं। शीर्णः। बहिरंगत्वेन इडसिद्धत्वान्नेट्। कृतस्यापत्यं कार्त्तिः। भिन्नः। छिन्नः। संयोगादेरातो धातोर्य
ण्वतः। निष्ठातस्य नः स्यात्। द्राणः। ग्लानः। ल्वादिभ्यः। एकविंशतेर्ल्वादिभ्यः प्राग्वत्। लूनः। ज्या ग्रहिज्या। जी
नः। दुग्वोर्दीर्घश्च। दूनः। टुदु उपतापे इत्यस्य तु न गृह्यते। सानुबन्धत्वात्। मृदुतया दुतयोति माघः। गूनः। पूञो
विनाशे। पूना यवाः। विनष्टा इत्यर्थः। पूतमन्यत्। सिनोतेर्ग्रासकर्मकर्तृकस्य। सिनो ग्रासः। ग्रासे किं। सिता पा
शेन सूकरी। कर्मकर्तृके इति किं। सितो ग्रासो देवदत्तेन। ओदितश्च। भुजो। भुग्नः। टुओश्वि। उच्छूनः। ओहाक्। प्रहीणः।
स्वादय ओदित इत्युक्तं। सूनः। सूनवान्। दूनः। दूनवान्। ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्। उड्डीनः। द्रवमूर्ति
स्पर्शयोः श्यः। द्रवस्य मूर्तौ काठिण्ये स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायां। श्योऽस्पर्शे। श्यैङो निष्ठात
स्य नः स्यात्। अस्पर्शार्थे। हल इति दीर्घः। शीनं घृतं। अस्पर्शे किं। शीतं जलं। द्रवमूर्तिस्पर्शयोरिति किं। सं

श्यानो वृश्चिकः। शीतात्संकुचित इत्यर्थः। प्रतेश्च। प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायां। प्रतिशीनः। विभा
षाभ्यवपूर्वस्य। श्यः संप्रसारणं वा स्यात्। अभिश्यानं घृतं। अभिशीनं। अवश्यानो वशीनो वृश्चिकः। व्यवस्थि
तविभाषेयं। तेनेह न। समवश्यानः। अंचोनपादाने। अञ्चो निष्ठातस्य नः स्यान्नत्वपादाने। यस्य विभाषा। यस्य
क्वचिद्विभाषया इड्विहितस्ततो निष्ठाया इण्न स्यात्। उदितो वेति क्त्वायां वेट्त्वादिह नेट्। समक्नः। अनपादा
ने किं। उदक्तमुदकं कूपात्। णत्वस्यासिद्धत्वाद्वृश्चेति षत्वे प्राप्ते। निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः।
वृक्णः। वृक्णवान्। परिस्कंदः प्राच्यभरतेषु। पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते। परिस्कंदः। प्राच्येति किं। प
रिष्कंदः। परिस्कंदः। परेश्चेति विकल्पः। स्तम्भेरिति षत्वे प्राप्ते। प्रतिस्तब्धनिस्तब्धौ च। अत्र षत्वं न स्यात्। दिवोवि
जिगीषायां। दिवो निष्ठातस्य न स्यात्। अविजिगीषायां। द्यूनः। विजिगीषायां तु द्यूतं। निर्वाणोऽवाते। अवात इ
ति छेदः। निर्पूर्वाद्वातेर्निष्ठातस्य नत्वं स्यात्। वातश्चेत्कर्त्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः। शुषः
कः। निष्ठात इत्येव। शुष्कः। पचो वः। पक्वः। क्षायो मः। क्षामः। स्त्यः प्रपूर्वस्य। प्रात्स्त्यः संप्रसारणं स्यान्निष्ठा

यां। प्रस्त्योन्यतरस्यां॥ निष्ठातस्यमोवास्यात्। प्रस्तीमः। प्रस्तीतः। मात्किं। स्त्यानः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥ जि
फला। फुल्लः। निष्ठातस्यलत्वंनिपात्यते। क्तवत्वेकदेशस्यापीदंनिपातनमिष्यते। फुल्लवान्। क्षीबादिषुतुक्तप्रत्ययस्यैवतलोपः।
तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्चनिपात्यते। क्षीबृमदे। क्षीबोमत्तः। कृशस्तनुः। लाघृशक्तौ। भ्वादिः। उल्लाघोनीरोगः। अनु
पसर्गात्किं। आदितश्च। आकारेतोनिष्ठायाइण्नस्यात्। तिच। चरफलोरतउत्स्यात्तादौकिति। प्रफुल्तः। प्रक्षीबितः। प्रकृ
शितः। प्रोल्लाघितः। कथंतर्हिलोप्रडुमंसानुमतःप्रफुल्लमिति। फुल्लविकसने पचाद्यच्। सूत्रंतुफुल्लतादिनिवृत्त्यर्थं। उत्फु
ल्लसंफुल्लयोरुपसंख्यानं। नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्यां॥ एभ्योनिष्ठातस्यनोवा। नुन्नः। नुत्तः। विदविचारणे रौधादि
कएवगृह्यते। उंदिनापरेणसाहचर्यात्। विन्नः। वित्तः। वेत्तेस्तुविदितः। विद्यतेर्विन्नः। उंदी। श्वीदितोनिष्ठायां। श्वयतेरीदि
तश्चनिष्ठायाइण्नस्यात्। उन्नः। उत्तः। त्राणः। त्रातः। घ्राणः। घ्रातः। ह्रीणः। ह्रीतः। नध्याख्यापृमूर्छिमदां॥ एभ्योनिष्ठा
तस्यनत्वंन। ध्यातः। ख्यातः। पूर्त्तः। राल्लोपः। मूर्त्तः। मत्तः। वित्तोभोगप्रत्यययोः॥ विंदतेर्निष्ठांतस्यनिपातोयंभोग्यप्रती
तेचार्थे। वित्तंधनं। वित्तःपुरुषः। अनयोःकिं। विन्नः। विभाषागमहनेतिक्वसौवेट्त्वादिहनेट्। भित्तंशकलं॥ भिन्नम
न्यत्। ऋणमाधमर्ण्ये॥ ऋधातोःक्तेतकारस्यनत्वंनिपात्यतेअधमर्णव्यवहारे। ऋतमन्यत्। स्फायस्फीनिष्ठायां॥

स्फीतः। इण्निष्ठायां॥ निरःकुषोनिष्ठायाइट्स्यात्॥ अस्यविभाषेतिनिषेधेप्राप्तेपुनर्विधिः। निष्कुषितः। वसतिक्षुधोरिट्॥ आभ्यां
क्त्वानिष्ठयोरिट्नित्यःस्यात्॥ उषितः। क्षुधितः। अंचेःपूजायां॥ पूजार्थादंचेः क्त्वानिष्ठयोरिट्स्यात्॥ ~~अंचितः। अंचित्वा~~। अंचि
तः। गतौतुअक्तः। लुभोविमोहने॥ लुभःक्त्वानिष्ठयोरिट्स्यान्नतुगार्द्ध्ये। लुभितः। गार्द्ध्येतुलुब्धः। क्लिशःक्त्वानिष्ठयोः॥ इड्
वास्यात्। क्लिशउपतापेनित्यंप्राप्तेविकल्पः। क्लिशितः। क्लिष्टः। पूङश्च। पूङःक्त्वानिष्ठयोरिड्वास्यात्। पूङःक्त्वाच॥ पू
ङःक्त्वानिष्ठाचसेट्किन्नस्यात्॥ पवितः। पूतः। क्त्वाग्रहणमुत्तरार्थं नोपधादित्यत्रक्त्वैवसंबध्यते। निष्ठाशीङ्स्वि
दिमिदिक्ष्विदिधृषः॥ एभ्यःसेण्निष्ठाकिन्नस्यात्॥ शयितः। शयितवान्। अनुबंधनिर्देशोयङ्लुङ्निवृत्त्यर्थः॥
शेश्यितः। शेश्यितवान्। आदिकर्मणिनिष्ठावक्तव्या॥ आदिकर्मणिक्तःकर्तरिच॥ आदिकर्मणियःक्तःसकर्तरिस्या
त्। चाद्भावकर्मणोः। विभाषाभावादिकर्मणोः॥ भावेआदिकर्मणिचआदितोनिष्ठायाइड्वास्यात्॥ प्रस्वेदितश्चैत्रः।
प्रस्वेदितंतेन। ञिक्ष्विदेतिष्वादिरत्रगृह्यते। ञीद्भिःसाहचर्यात्। स्विद्यतेस्तुस्विदितइत्येव। ञिमिदाञिक्ष्विदादिवादी
भ्वादीच। प्रमेदितः। प्रमेदितवान्। प्रधर्षितः। प्रधर्षितवान्। धर्षितंतेन। सेट्किं। प्रस्विन्नः। प्रस्विन्नंतेनेत्यादि। मृ

षस्तितिष्ठायां॥ सेण्निष्ठाकिन्नस्यात्। मर्षितोमर्षितवान्। क्षमायांकिं। अपमृषितंवाक्यं। अविस्पष्टमित्यर्थः॥
उदुपधाद्भावादिकर्मणोरन्यतरस्यां॥ उदुपधात्पराभावादिकर्मणोःसेण्निष्ठावाकिन्नस्यात्॥ द्युतितं। द्योतितं।
मुदितं। मोदितंसाधुना। प्रद्युतितः। प्रद्योतितः। प्रमुदितः। प्रमोदितः। साधुः। उदुपधात्किं। विदितं। भावेत्यादि
किं। रुचितंकार्षापणं। सेट्किं। कुष्टं। शब्विकरणेभ्यएवेष्यते। तेनेह न। गुध्यते। गुधितं। निष्ठायामेटि॥ णेर्लोपःस्या
त्। भावितो भावितवान्॥ श्वीदितइतिनेट्। संप्रसारणं। शूनः। दीप्तः। गुहू गूढः। वनु। तनु। वतः। ततः। पतेःसनिवेट्क
त्वादिडभावेप्राप्ते द्वितीयाश्रितेतिसूत्रेनिपातनादिट्। पतितः। सेसिचीतिवेट्कत्वात्सिद्धंकृतत्यादीनामीदित्वेनातिं
त्वज्ञापनाद्वा। तेनधावितमिभराजधियेत्यादि। यस्यविभाषेत्यत्रएकाच्चइत्येव। दरिद्रितः॥ क्षुब्धस्वांतध्वांतलग्न
म्लिष्टविरिब्धफांटबाढानिमंथमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु॥ क्षुब्धादीन्यष्टौअनिट्कानिनि
पात्यंते। समुदायेनमंथादिषुवाच्येषु। द्रवद्रव्यसंसृक्ताःसक्तवोमंथः। मंथनदंडश्च। क्षुब्धःमंथश्चेत्। स्वांतंम
नः। ध्वांतंतमः। लग्नंसक्तं। निष्ठानत्वमपिनिपातनात्। म्लिष्टमविस्पष्टं। विरिब्धःस्वरः। म्लेछरेभृअनयोरुपधा

याइत्वमपिनिपात्यते। फांटंअनायाससाध्यःकषायविशेषः। माधवस्तुनवनीतभावात्प्रागवस्थापन्नंद्रव्यंफांटमितिवे
दभाष्येआह। बाढंभृशं। अन्यत्रक्षुभितं। क्षुब्धोराजेतिआगमशास्त्रस्यानित्यत्वात्। स्वनितं। ध्वनितं। लगितं। म्लेछि
तं। विरेभितंफणितं। बाहितं। धृषिशसीवैयात्ये॥ एतौनिष्ठायामविनयेएवानिटौस्तः। धृष्टोविशस्तः। अन्यत्रधर्षितः।
विशसितः। भावादिकर्मणोस्तुवैयात्येधृषिर्नास्ति। अतएवनियमार्थमिदंसूत्रमितिवृत्तिः। धृषेरादित्वेफलंचिंत्य
मितिहरदत्तः। माधवस्तुभावादिकर्मणोरवैयात्येविकल्पमाह। धृष्टं। धर्षितं। प्रधृष्टः। प्रधर्षितः। दृढःस्थूलबल
योः॥ स्थूलेबलवतिचनिपात्यते। दृह दृहि वृद्धौ। तस्यइडभावः। तस्यढत्वं। हस्यलोपः। इदितोनलोपश्च। दृंहितो दृंहि
तोन्यः। प्रभौपरिवृढः॥ वृह वृहि वृद्धौ। निपातनंप्राग्वत्। परिबृहितः। परिबृंहितोन्यः। कृच्छ्रगहनयोःकषः॥ कषोनिष्ठा
याइण्नस्यात्। एतयोरर्थयोः। कष्टंदुःखंतत्कारणंच। स्यात्कष्टंकृच्छ्रमाभीलं। कष्टोमोहः। कष्टंशास्त्रं। दुरवगाह
मित्यर्थः। कषितमन्यत्। घुषिरविशब्दने॥ घुषिर्निष्ठायामनिट्स्यात्। घुष्टारज्जुः। अविशब्दनेकिं। घुषितंवाक्यं। श
ब्देनप्रकटीकृताभिप्रायमित्यर्थः। अर्देःसंनिविभ्यः॥ एतत्पूर्वादर्देर्निष्ठायाइण्नस्यात्। समर्णः। न्यर्णः। व्यर्णः।
अर्दितोन्यः। अभेश्चाविदूर्ये॥ अभ्यर्णं। नातिदूरं। आसन्नंवा। अभ्यर्दितमन्यत्। णेरध्ययनेवृत्तं॥ ण्यंतादृत्तेः क्तस्ये म

सि॰ कौ॰
॥१७॥

उभायोर्णिलुक्च अधीयमानेर्थे। वृत्तंछंदः। छात्रेणसंपादितं। अधीतमितियावत्। अन्यत्रतुवर्तितारज्जुः। शृतंपाके॥ श्राति
श्रपयत्योः क्तः श्रभावोनिपात्यते। क्षीरहविषोःपाके। शृतंक्षीरं। स्वयमेवविक्लिन्नंपक्वंवेत्यर्थः। क्षीरहविर्भ्यामन्यत्तुश्राणं
श्रपितंवा। वाढांतशांतपूर्णदस्तस्पष्टछन्नज्ञप्ताः॥ एतेणिचिनिष्ठांतानिपात्यंते। पक्षेशमितः। दमितः। पूरितः। दासितः।
स्पाशितः। छादितः। ज्ञपितः। रुष्यमत्वरसंघुषास्वनां॥ एभ्योनिष्ठायाइड्वा। रुष्टं। रुषितः। आंतः। अमितः। तूर्णः। त्वरितः।
अस्यादित्वेफलमदं। संघुष्टः। संघुषितः। अस्वांतः। अस्वनितः। हृषेर्लोमसु। हृषेर्निष्ठायाइड्वास्याल्लोमसुविषये।
हृष्टं। हृषितंलोम। विस्मितप्रतिघातयोश्च। हृष्टोहृषितोमैत्रः। विस्मितः प्रतिहतोवेत्यर्थः। अन्यत्रतुहृषु अलीके। ग
उदित्वान्निष्ठायांनेट्। हृषतुष्टौ। इट्। अपचितश्च॥ चायतेर्निपातोयंवा। अपचितः। अपचायितः। प्यायःपी॥ वास्या
न्निष्ठायां। व्यवस्थितविभाषेयं। तेनस्वांगेनित्यं। पीनंमुखं। अन्यत्रप्यानः पीनः स्वेदः। सोपसर्गस्यन। प्रप्यानः। आ
ङ्पूर्वस्यांधूधसोःस्यादेव। आपीनोंधुः। आपीनमूधः। ह्लादोनिष्ठायां॥ ह्रस्वःस्यादेव। प्रह्लन्नः। द्यतिस्यतिमास्था
मित्तिकिति। एषामिकारोंतादेशः स्यात्तादौ। ईत्वस्यह्वावयोरपवादः॥ दितः। सितः। मामाङ्मेङू मितः। स्थितः। शा

छोरन्यतरस्यां॥ शितः। शातः। छितः। छातः। व्यवस्थितविभाषात्वात् व्रतेविषयेश्यतेर्नित्यं। संशितं। सम्यक्संपादितमित्य
र्थः। संशितोब्राह्मणः। व्रतविषयकफलवानित्यर्थः। दधातेर्हिः॥ तादौकिति। अभिहितं। निहितं। दोदद्घोः॥ घुसंज्ञकस्य
दाइत्यस्यदथ्स्यात्तादौकिति। चर्त्वं। दत्तः। घोःकिं। दातः। तांतोवायमादेशः। नचैवंविदत्तमित्यादौउपसर्गस्यदस्ती
तिदीर्घत्वापत्तिः। तकारादोतद्विधानात्। दांतोवाधांतोवा। नचदांतत्वेनिष्ठानत्वं। धांतत्वेझषस्तथोरितिधत्वंशंक्यं॥
सन्निपातपरिभाषाविरोधात्। अचउपसर्गात्तः॥ अजंताउपसर्गात्परस्यदाइत्यस्यघोःअचस्तःस्यात्तादौकिति॥
चर्त्वं। प्रत्तः। अवत्तः। अवदत्तंप्रदत्तंचविदत्तंचादिकर्मणि। सुदत्तमनुदत्तंचनिदत्तमितिचेष्यते। चशब्दाद्यथाप्राप्तं
दत्ति॥ इगंतोपसर्गस्यदीर्घःस्याद्दादेशेयस्तकारस्तदादावुत्तरपदे। खरिचेतिचर्त्वमाश्रमात्सिद्धं। नीत्तं। सूत्तं।
घुमास्थेतीत्वं। धेट् धीतं। गै गीतं। पीतं। जनसनेत्यात्वं। जातं। सातं। खातं। अदोजग्धिर्ल्यप्तिकिति॥ ल्यबितिलुप्तस
प्तमीकं। अदोजग्धिःस्याल्ल्यपितादौकितिच। इकारउच्चारणार्थः। धत्वं। झलांजशझशि॥ जग्धः। आदिकर्मणिक्तःक
र्त्तरिच॥ प्रकृतः कटंसः। प्रकृतः कटस्तेन। निष्ठायामण्यदर्थेइतिदीर्घः। क्षियोदीर्घादितिनत्वं। प्रक्षीणःसः। वाक्रो

सि० कौ०
॥१८॥

ग्रदैन्ययोः॥ क्षियोनिष्ठायांदीर्घोवास्यादाक्रोशदैन्येच। क्षीणायुर्भवक्षितायुर्वा। क्षीणोयंतपस्वीक्षितोवा॥ निनदीभ्यां
स्नातेःकौशले॥ आभ्यांस्नातेःसस्यषत्वंस्यात्कौशलेगम्ये। निष्णातःशास्त्रेषु। नदीष्णः। सुपीतिकः। सूत्रंप्रतिष्णा
तं॥ प्रतेःस्नातेःसस्यषत्वंप्रतिष्णातंसूत्रं। शुद्धमित्यर्थः। अन्यत्रप्रतिस्नातं। कपिष्ठलोगोत्रे॥ कपिष्ठलोनामय
स्यकापिष्ठलिःपुत्रः। गोत्रेकिं। कपीनांस्थलंकपिस्थलं। विकुशमिपरिभ्यस्थलं॥ एभ्यस्थलस्यसस्यषःस्यात्। विष्ठलं।
कुष्ठलं। शमिष्ठलं। परिष्ठलं। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च॥ एभ्यःकर्त्तरिक्तःस्याद्भावकर्म
णोश्च। गंगांगतः। गंगांप्राप्तः। ग्लानःसः। लक्ष्मीमाश्लिष्टोहरिः। शेषमधिशयितः। वैकुंठमधिष्ठितः। शिवमुपासि
तः। हरिदिनमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षेप्राप्तागंगायेनेत्यादि। क्तोधिकरणेचध्रौ
व्यगतिप्रत्यवसानार्थेभ्यः॥ एभ्योधिकरणेक्तःस्याच्चाद्यथाप्राप्तं। ध्रौव्यं। स्थैर्यं। मुकुंदस्यासितमिदमिदंयातंर
मापतेः। भुक्तमेतदनंतस्येत्यूचुर्गोप्योदिदृक्षवः। पक्षेआसेरकर्मकत्वात्कर्त्तरिभावेच। आसितोमुकुंदः। आसि
तंतेन। गत्यर्थेभ्यःकर्मणिकर्त्तरिच। रमापतिरिदंयातः। तेनेदंयातं। भुजेःकर्मणि। अनंतेनेदंभुक्तं। कथंभुक्ताब्रा

ह्मणाइति। भुक्तमस्त्येषामितिमत्वर्थीयोच्। वर्त्तमानेइत्यधिकृत्य। ञीतःक्तः। ञिक्ष्विदा। क्ष्विण्णः। आर्त्तं भुजेःकर्मणि।
अनंतेनेदंभुक्तं। ञिइंधी। इद्धः। मतिबुद्धिपूजार्थेभ्यश्च॥ मतिरिहेच्छा। बुद्धेःपृथगुपादानात्। राज्ञांमतः। इष्टः। तैरि
ष्यमाणइत्यर्थः। बुद्धः। विदितः। पूजितः। अर्चितः। चकारोनुक्तसमुच्चयार्थः। शीलितोरक्षितः। क्षांतः। आक्रुष्टोजु
ष्टइत्यादि। नपुंसकेभावेक्तः॥ क्लीबत्वविशिष्टेभावेकालसामान्येक्तःस्यात्। जल्पितं। शयितं। हसितं। सुयजोर्ङ्वनि
प्॥ सुनोतेर्यजतेश्चङ्वनिप्स्यात्। भूते। सुत्वा। सुत्वानौ। यज्वा। यज्वानौ। जीर्यतेरतृन्॥ भूतेइत्येव। जरन्। जर
न्तौ। जरंतः। वासरूपन्यायेननिष्ठापि। जीर्णो। जीर्णवान्। छंदसिलिट्॥ लिटःकानज्वा॥ क्वसुश्च॥ इहभूतसामान्ये
छंदसिलिट्। तस्यविधीयमानौक्वसुकानचावपिछांदसावितित्रिमुनिसंमतं। कवयस्तुबहुलंप्रयुंजते। तंतस्थिवां
संनगरोपकंठे। श्रेयांसिसर्वाण्यधिजग्मुषस्ते। इत्यादि। वस्वेकाजाद्घसां॥ कृतद्विर्वचनानामेकाचामादंतानांघसेश्च
वसौरिट्नान्येषां। आटिवान्। आदिवान्। पेचिवान्। ददिवान्। जक्षिवान्। एषांकिं। बभूवान्। भाषायांसदवसश्रुवः॥
सदादिभ्योभूतसामान्येभाषायांलिट्वास्यात्। तस्यचनित्यंक्वसुः। निषेदुषीमासनबंधधीरः। अध्यूषुषस्तामभ

वलम्बस्यै। शुश्रुवान्। उपेयिवाननाश्वाननूचानश्च॥ एतेनिपात्यंते। उपपूर्वादिणोभाषायामपिक्वसुस्तन्मात्रेलिङ्गातस्यनित्यंक्वसुः। उ
पेयिवान्। उपेयुषस्त्वामपिमूर्त्तिमिज्यां। उपेयुषी। उपेत्यविवक्षितं। ईयिवान्। समीयिवान्। नञ्पूर्वादश्नातेः क्वसुरिडभावश्च। अ
तजयधतेरनाश्वपः इतिभारविः। अनुपूर्वाद्वचेःकर्त्तरिकानच्। वेदस्यानुवचनंकृतवाननूचानः। विभाषागमहनविदविशां॥
एभ्योवसोरिड्वा। जग्मिवान्। जगन्वान्। जघ्निवान्। जघन्वान्। विविदिवान्। विविद्वान्। विविशिवान्। विविश्वान्। विशिनासाह
चर्यात्विदेर्ग्रहणं। वेत्तेस्तुविविद्वान्। दृशेश्च। ददृशिवान्। ददृश्वान्। लटःशतृशानचावप्रथमासमानाधिकरणे॥ अप्रथ
मांतेनसामानाधिकरणेसतीत्यर्थः। शबादि। पचंतंचैत्रंपश्य। आनेमुक्॥ अंगस्यातोमुगागमःस्यादानेपरे। पचमानंचैत्रंप
श्य। लडित्यनुवर्त्तमानेपुनर्लड्ग्रहणंअधिकविधानार्थं। तेनप्रथमासामानाधिकरण्येपिक्वचित्। सन्ब्राह्मणः। माङ्या
क्रोशेइतिवाच्यं। माजीवन्। माङिलुङितिप्राप्तेएतद्वचनसामर्थ्याल्लट्। संबोधनेच॥ हेपचन्। हेपचमान। लक्षणहेत्वोः
क्रियायाः॥ क्रियायाःपरिचायकेहेतौवर्त्तमानाद्धातोःलटःशतृशानचौस्तः। शयानाभुंजतेयवनाः। अर्जयन्वसति।
हरिंपश्यन्मुच्यते। हेतुःफलंकारणंच। कृत्यचः। प्रवीयमाणः। ईदासः॥ आसःपरस्यानस्यईत्स्यात्। आदेःपरस्य। आसी
नः। विदेःशतुर्वसुः॥ वेत्तेःपरस्यशतुर्वसुरादेशोवास्यात्। विदन्। विद्वान्। विदुषी। तौसत्॥ तौशतृशानचौसत्संज्ञौस्तः। लृटः

सद्वा॥ व्यवस्थितविभाषेयं॥ तेनाप्रथमासामानाधिकरण्येप्रत्ययोत्तरपदयोःसंबोधनेलक्षणहेत्वोश्चनित्यं। करिष्यंतंकरिष्यमा
णंपश्य। करिष्यतोपत्यंकारिष्यतः। करिष्यद्भक्तिः। हेकरिष्यन्। अर्जयिष्यन्वसति। प्रथमासामानाधिकरणेपिक्वचित्। करिष्य
ति। करिष्यन्। पूङ्यजोःशानन्॥ वर्त्तमाने। पवमानः। यजमानः। ताच्छील्यवयोवचनशक्तिषुचानश्॥ एषुद्योत्येषुकर्त्तरिचा
नश्। भोगंभुंजानः। कवचंबिभ्राणः। शत्रून्निघ्नानः। इङ्धार्योःशत्रकृच्छ्रिणि॥ आभ्यांशतृस्यादकृच्छ्रिणिकर्त्तरि। अधीय
न्। धारयन्। अकृच्छ्रिणिकिं। कृच्छ्रेणाधीतेधारयति। द्विषोमित्रे॥ द्विषन्शत्रुः। सुञोयज्ञसंयोगे॥ सर्वेसुन्वंतः। सर्वेयजमा
नाःसत्रिणः। अर्हःप्रशंसायां॥ अर्हन्। आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु॥ क्विपमभिव्याप्यवक्ष्यमाणाःप्रत्ययाःतच्छी
लादिषुकर्त्तृषुबोध्याः। तृन्॥ कर्त्ताकटान्। अलंकृञ्निराकृञ्प्रजनोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचरइष्णुच्। अलंक
रिष्णुरित्यादि। णेश्छंदसि॥ वीरुधःपारयिष्णवः। भुवश्च॥ छंदसीत्येव। कथंतर्हिजगत्प्रभोरप्रभविष्णुवैष्णवमिति। नि
रंकुशाःकवयः। चकारोनुक्तसमुच्चयार्थः। भ्राजिष्णुरितिवृत्तिः। एवंक्षयिष्णुः। नैतद्भाष्येदृष्टं। ग्लाजिस्थश्चग्स्नुः॥ छंदसी
तिनिवृत्तं॥ गिदयंनतुकित्। तेनस्थईत्वंन। ग्लास्नुः। गिलान्नगुणः। जिष्णुः। स्थास्नुः। चाभूवः। श्युकःकितीत्यत्रगकारप्रश्ले

सि॰कौ॰ षात्नेट् ॥ भृष्णुः ॥ दंशेश्छंदस्युपसंख्यानं ॥ दंक्ष्णवः पशवः ॥ त्रसिगृधिधृषिक्षिपेः क्नुः ॥ त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥ ॥ कृ॰ ॥
२० शमित्यष्टाभ्यो घिनुण् ॥ उकार उच्चारणार्थ इति काशिका । अनुबंध इति भाष्यं । तेन शमिनी तरा शमिनितरे सत्रो
गितश्चेति ह्रस्वविकल्पः ॥ नचैवं शमी शमिना विसादौ नुमप्रसंगः ॥ झल्परत्वणमपरूप्यश्लंतानामेव तद्विधा
नात् ॥ नोदात्तोपदेशस्येति वृद्धिनिषेधः ॥ शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्लमी । प्रमादी । उत्पूर्वो मदे
रलंकृञादिसूत्रेणेष्णुच्‌प्राप्तो वासरूपविधिना घिनुणपि । उन्मादी । ताच्छीलिकेषु वासरूपविधिर्नास्तीति तु
प्रायिकं । संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमु
हदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥ एभ्यो घिनुण् स्यात् ॥ संप २०
र्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवा
दी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचा

बौ

चारी । अपचारी । आमोषी । अभ्याघाती । कषलसकत्थस्रंभः ॥ विकाषी । विलासी । विकत्थी । विस्रंभी । अपेचलषः ॥
चाहो ॥ अपलाषी । विलाषी । प्रेलपसुद्रुमथवदवसः ॥ प्रलापी ॥ प्रस्नापी ॥ प्रद्रावी ॥ प्रमाथी ॥ प्रवादी ॥ प्रवासी
निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ् ॥ पंचम्यर्थे प्रथमा ॥ एभ्यो वुञ् ॥ नि
दकः ॥ हिंसक इत्यादि । ण्वुला सिद्धे वुञ्वचनं ज्ञापकं ॥ ताच्छील्यादिषु वासरूपन्यायेन तृजादयो नेति ॥ देवि
क्रुशोश्चोपसर्गे ॥ आदेवकः ॥ आक्रोशकः ॥ उपसर्गे किं ॥ देविता । क्रोष्टा ॥ चलनशब्दार्थादकर्मकाद्युच् ॥
चेतलनार्थाच्छब्दार्थाच्च युच् स्यात् ॥ चलनः ॥ चोपनः ॥ कंपनः ॥ शब्दनः ॥ रवणः ॥ अकर्मकात्किं ॥ पठिता
विद्यां ॥ अनुदात्तेतश्च हलादेः ॥ अकर्मकाद्युच् स्यात् ॥ वर्तनः ॥ वर्धनः ॥ अनुदात्तेतः किं ॥ भविता ॥ हला
देः किं ॥ एधिता ॥ अकर्मकात्किं ॥ वसिता वस्त्रं ॥ जुचंक्रम्यदंद्रम्यसृगृधिज्वललषपतपदः ॥ जु इति शुच
सौत्रो धातुः ॥ गतौ वेगे च ॥ जवनः ॥ चंक्रमणः ॥ दंद्रमणः ॥ सरणः ॥ पूर्वेण सिद्धे परग्रहणं लषप

शि

सि.कौ. तपदेतुकञ्चाबाधामाभूदिति॥ तेनताच्छीलिकेषुपरस्परंवासरूपविधिर्नास्तीति। तेनालंकृञ्ज्ञसलल्॥ कृधमंडार्थेभ्यश्च॥ क्रोधनः॥
॥२७॥ रोषणः॥ मंडनः॥ भूषणः॥ नयनः॥ यकारान्तात्किंक्तस्यात्तू॥ क्नूयिता॥ क्ष्मायिता॥ सूददीपदीक्षश्च। कृजनः॥ सूदिता। दीपिता। दी
क्षिता। नमिकंपीतिरेणयुचो बाधे सिद्धे दीपग्रहणं ज्ञापयति। ताच्छीलिकेषु वासरूपविधिर्नास्तीति। प्रायिकमिति। तेनकं
ऽस्माकमनाकपयति॥ कंप्राकंपिना। शाखा। यदिसूदेर्युजनू। कथंमधुसूदनः॥ नंद्यादिः॥ लषपतपदस्थाभूवृषहनकमगमशृभ्यउक
ञ्॥ लषुकः॥ पातुकइत्यादि। जल्पभिक्षकुट्टलुंटवृङःषाकन्॥ जल्पाकः॥ भिक्षाकः॥ कुट्टाकः॥ लुंटाकः॥ वराकः॥ वराकी।
प्रजोरिनिः। प्रजवी। प्रजविनौ। प्रजविनः॥ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च॥ जयी। दरी। क्षयी। विश्रयी।
अत्ययी। वमी। अव्यथी। अभ्यमी। परिभवी। प्रसवी। स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्यआलुच्॥ आद्यास्त्रयश्चु
रादावदन्ताः॥ स्पृहयालुः॥ गृहयालुः॥ पतयालुः॥ दयालुः॥ निद्रालुः। तत्पूर्वोद्रातदोनानत्वं निपात्यते। तन्द्रालुः॥ श्र
डो द्धालुः॥ शीङोवाच्यः॥ शयालुः॥ दाधेट्सिशदसदोरुः॥ धारुः॥ सेरुः॥ शद्रुः॥ सद्रुः॥ सृघस्यदः क्मरच्॥ सृमरः॥ ॥२३॥
घस्मरः॥ अ द्मरः॥ भंजभासमिदोघुरच्॥ भंगुरः॥ भासुरः॥ मेदुरः॥ विदिभिदिछिदेःकुरच्॥ विदुरः। भिदुरः। छि

दारुः॥

दुरः। इण्नशजिसर्तिभ्यःक्वरप्॥ इत्वरः। इत्वरी। नश्वरः। जित्वरः। सृत्वरः। गत्वरश्च। गमेरनुनासिकलोपो वि
निपात्यते। गत्वरी। जागरूकः॥ जागर्तेरूकः स्यात्। जागरूकः। यजजपदशां यङः॥ एभ्यो यङंतेभ्यो
ऊकःस्यात्। दृशग्रमिति भाविनानलोपेन निर्देशः। यायजूकः। जंजपूकः। दंदशूकः॥ नमिकंपिस्म्यजस
कमहिंसदीपोरः॥ नम्रः॥ कंप्रः॥ स्मेरः॥ जसिर्नञ्पूर्वः क्रियासातत्येवर्तते। अजस्रं सततमित्यर्थः॥ कंम्रः। हिं
स्रः। दीप्रः। सनाशंसभिक्षउः॥ चिकीर्षुः। आशंसुः। भिक्षुः॥ विंदुरिच्छुः॥ वेत्तेर्नुम इषेश्छत्वंच निपात्यते। वे
त्तितच्छीलो विंदुः। इच्छतीइच्छुः क्याछंदसि। देवो जिगातिसुम्नयुः॥ आदृगमहनजनः किकिनौ लिट्च॥ आ
दंतादृदंताद्गमादिभ्यश्च किकिनौ स्तःछंदसि तौच लिड्वत्॥ पपिः सोमं ददिर्गाः॥ बभ्रिर्वज्रं। जग्मिर्युवा। ज
त्रि घ्निर्वृत्रमित्रियं। जज्ञिः॥ भाषायांधाञ्कृसृगमिजनिनमिभ्यः॥ दधिः॥ चक्रिः॥ सस्रिः॥ जग्मिः॥ जज्ञिः॥
नेमिः॥ सासहिवावहिचाचलिपापतीनामुपसंख्यानं॥ यङंतेभ्यः सहत्यादिभ्यः किकिनौ षत्वाभा ग
वश्च निपात्यते। स्वपितृषोर्नजिङ्॥ स्वप्नक्। तृष्णक्। तृष्णजौ। तृष्णजः। धृषेश्चेतिवाच्यमिति काशि
कारो। धृष्णक्। शृवंद्योरारुः॥ शरारुः॥ वंदारुः॥ भियःक्रुक्लुकनौ॥ भीरुः। भीलुकः। क्रुकन्नपिवाच्यः॥

भीरुकः॥ स्थेशभासपिसकसो वरच्॥ स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः। यश्च यङः॥ यातेर्यङन्ता
॥२२॥ द्वरच् स्यात्। अतो लोपः। तस्य यलोपं प्रति स्थानिवत्त्वनिषेधाल्लोपो व्योर्वलीति यलोपः। अल्लोपस्य स्थानिव
त्त्वमाश्रित्य आतो लोपे प्राप्ते वरे लुप्तं न स्थानिवत्। यायावरः॥ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्॥
विभ्राट्। भाः। भासौ। धूः। धुरौ। विद्युत्। ऊर्क्। पूः। पुरौ। दृशिग्रहणस्यापकर्षात् जवतेर्दीर्घः। जूः। जुवौ॥ ग्रा
वः। ग्रावशब्दस्य धातुना समासः सूत्रे निपात्यते ततः क्विप्। ग्रावस्तुत्। अन्येभ्योऽपि दृश्यते॥ क्विप्। छित्।
भिद्। दृशिग्रहणं विध्यन्तरोपसंग्रहणार्थं। क्वचित् संप्रसारणं न। क्वचिद्द्वे। क्वचिद्ध्रस्वः। तथ च वार्त्ति
कं। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च॥ क्विब्वचीत्यादौ मा उणादिसूत्रेण केषांचित्सि
द्धेस्तच्छीलादौ तृना बाधा मा भूदिति वार्त्तिके ग्रहणं॥ वक्तीति वाक्। पृच्छतीति प्राट्। आयतं स्तौतीति
आयतस्तूः। कटं प्रवते। कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः। द्युतिगमिजुहोतीनां द्वे च॥ दृशिग्रहणादभ्यास ॥२२॥
संज्ञा॥ दिद्युत्। जगत्। गमः क्वौ॥ जुहोतेर्दीर्घश्च॥ जुहूः। दृभय। अस्य ह्रस्वश्च॥ दीर्घ इति द्वयं। ध्यायतेः संप्रसा

क्वचिद्दीर्घः।

रणं च॥ धीः॥ भुवः संज्ञान्तरयोः॥ मित्रभूर्नाम कश्चित्। धनकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रभूः॥ विप्र
संभ्योड्वसंज्ञायां। एभ्यो भुवो डुः स्यान्न तु संज्ञायां॥ विभुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम
कश्चित्। मितद्र्वादिभ्य उपसंख्यानं॥ मितं द्रवतीति मितद्रुः। शंभुः। अन्तर्भावितण्यर्थोऽत्र भवतिः॥ धः क
र्मणि ष्ट्रन्॥ धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात्। धात्री जनन्यामलकीवसुमत्युपमातृषु॥ दाम्नीशसयुयुजस्तु
तुदसिसिचमिहपतदशनहः करणे॥ दाबादेः ष्ट्रन् स्यात् करणेऽर्थे। दाम्यनेन दात्रं। नेत्रं॥ तितुत्रतथसिसुसरक
सेषु च॥ एषां दशानां कृत्प्रत्ययानामिण्न स्यात्। शस्त्रं। योत्रं। योक्त्रं। स्तोत्रं। तोत्रं। सेत्रं। सेक्त्रं। मेढ्रं। पत्रं॥ दंष्ट्रा
नद्ध्री॥ हलसूकरयोः पुवः॥ पूङ्पूञोः करणे ष्ट्रन् तच्चेत् करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा
पोत्रं मुखमित्यर्थः॥ अर्ति[redacted]लूधूसूखनसहचर इत्रः॥ अरित्रं। लवित्रं। धवित्रं। सवित्रं। खनि
त्रं। सहित्रं। चरित्रं॥ पुवः संज्ञायां॥ पवित्रो येनाज्यमुत्पूयते। पवमानामिकावेष्टनं। कर्त्तरि चर्षिदेवतयोः॥ पुव
इत्रः स्यात्। ऋषौ करणे देवतायां कर्त्तरि। ऋषिर्वेदमन्त्रः। यदुक्तं ऋषिणा तिरश्चीनात्। पूयतेऽनेनेति पवित्रं। देवतायां तु

सि॰ कौ॰

क्षिः पवित्रं स मां पुनातु ॥ कौमुद्यामुत्तरार्धे पूर्वकृदंतं समाप्तं ॥ ॥ अथोणादयः ॥ कृवापाजिमिस्वदिसा
॥२३॥ ध्यशूभ्य उण् । करोतीति कारुः । शिल्पी कारकश्च । आतो युक् । वातीति वायुः । पायुर्गुदं । जयत्यभिभवति रो
गान् । जायुरौषधं । मिनोति प्रक्षिपति देहे ऊष्माणमिति मायुः पित्तं । स्वादुः । साध्नोति परकार्यं साधुः । अश्नुते आ
शु शीघ्रं । आशुर्व्रीहिः पाटलः स्यात् । छंदसीणः । मानं आयो । दृसनिजनिचरिभ्यो ञुण् । दीर्यत इति दारुः । सनुः प्र
स्थः सानुरस्त्रियां । जानु । जानुनी । इह जनिवध्योश्चेति न निषेधः । अनुबंधद्वयसामर्थ्यात् । चारुरम्यं । चाटु प्रेम य
वाक्यं । मृगय्वादित्वात् कुप्रत्यये चटु इत्यपि । किंजरयोः श्रिणः । किं शृणातीति किंशारुः । सस्यशूकं बाणश्च । जराम
एति जरायुर्गर्भाशयः । त्रो रश्च लः । तरंत्यनेन वर्णा इति तालु । कृके वचः कश्च । कृकेन गलेन वक्तीति । कृकवा
कुर्मयूरे च सरटे चरणायुधे इति विश्वः । भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः । भरति बिभर्ति वा भरुः स्वामी । ॥२३॥
हरश्च । म्रियंतेऽस्मिन्भूतानि मरुः । निर्जलदेशः । शेते शयुः । अजगरः । तरुर्वृक्षः । चरति भक्षयति देवतोद्देशमिति च
रुः । त्सरच्छद्मगतौ त्सरुः । खड्गादिमुष्टिः । तनु स्वल्पं । स्त्रियां मूर्तिस्तनुस्तनूः । धनुः शस्त्रविशेषः । धनुषा

च धनुर्विदुः धनुर्विद्याज्ञानिवर्ग इति श्रीहर्षः । मयुः किंनरः । मद्गुः पानीयकाकिका ऽतिरभसः । न्यङ्क्वादित्वात्कुत्वं जश्त्वेन
सस्य दः । अणश्च । अणुः लवलेशकणाणवः । चात्करिवटिभ्यां च । कटुः । चटति वदतीति वटुः । धान्ये नित् । धान्यवाचिन्य
णुप्रत्ययः स्यात्स च नित् । नित्वादाद्युदात्तः । प्रियंगवश्चीने । अणवश्चीने । व्रीहिभेदस्त्वणुः पुमान् । निद्ग्रहणं फलिपाटीत्या
दिसूत्रमभिव्याप्य संबध्यते । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्च । शृणातीति शारुराक्रोधकोपयोः । स्व
रुर्वज्रं । स्नेहुर्व्याधिः चंद्रश्च । त्रपु सीसं । पुंसि भूम्न्यसवः प्राणाः । वसुः क्लीबे ऽग्न्यायोक्के ऽग्नौ वसु तोये धने मणौ । हनि
वं र्वक्त्रैकदेशः । क्लेदुश्चंद्रः । बंधुः । मनुः । यातू बिदि अवयवे विंदुः । स्यंदेः संप्रसारणं धश्च । देशे नदविशेषेऽब्धौ सिंधुर्ना
सरिति स्त्रियामित्यमरः । उंदेरिच्चादेः । उनत्ति इंदुः । इषेः किच्च । इषुः स्यात्स च कित् । आदेरिकारादेशश्च । इष
तेऽस्मिन्निति इषुः शरः । इफइयोः । स्कंदेः सलोपश्च । कंदुः । सृजेरसुम् च । चात्सलोपः उप्रत्ययश्च । रज्जुः ।
सृतेराद्यंतविपर्ययश्च धात्वकारलकारयोर्विनिमयः । तर्कुः । सूत्रवेष्टनं । नावंचेः । न्यङ्क्वादित्वात्कुत्वं नियतमंचती

सि॰
सि॰ कौ॰

२४॥ ति। न्यंकुर्मृगः। फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च॥ फलेर्गुक्। फल्गुः। पाटेः पटुः। नमेः
पाटयतीति पटुः॥ नम्यतेऽनेन नाकुर्वल्मीकं। मन्यतेऽति मधुः॥ जायतेऽस्मिन्निति जतुः। वलेर्गुक्च॥ वल संवरणे। व
ल्गुः। शः किसन्वच्च। श्यतेरुः स्यात् स च किसन्वच्च। शिशुर्बालः। यो द्वे च। ययुरश्वोऽश्वमेधीयः। सन्वदि
ति प्रकृतेर्द्वे ग्रहणमित्त्वनिवृत्त्यर्थं। कुर्भ्रश्च॥ बभ्रुर्मुन्यंतरे विष्णौ बभ्रुर्नकुलपिंगलौ। चात् अन्यतोपि च
क्रुः कर्त्ता। जेघ्नुर्हन्ता। पपुः पालकः। पृभिदिव्यधिगृधिधृषिभ्यः॥ कुः स्यात्। पुरुः। भिनत्तीति भिदुर्वज्रं। ग्रहिज्ये
ति संप्रसारणं। विरहिणं विध्यतीति विधुः॥ विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे। गृधुः कामः। धृषुर्दक्षः। ॥२५॥
कृग्रोरुच्च। करोतीति कुरुः। गृणातीति गुरुः। अपदुःसुषु स्थः। सुषामादिषु चेति षत्वं। अपष्ठु प्रतिकूलं।
दुःष्ठु सुष्ठु। रपेरिच्चोपधायाः॥ अनिष्टं रपतीति रिपुः। अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्

(कामः। ९ ६ शतेश्च। शलधाद्रवतीति शलद्रुः नदीभेदः। १८

धुक् दीर्घहकाराश्च। अर्जयति गुणान् ऋजुः। सर्वान् विशेषेण पश्यतीति पशुः। कंतुः। अंधुः। कूपः। पांसु[illegible]र्नानद्वयोरजः॥ ताल
व्या। अपिदित्याश्च संवस्तूकरपासवः। बाधतेरति बाहुः। स्त्रीपुंसयोर्भुजः॥ प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च। त्रयाणां कुः
भ्रस्जेः सलोपश्च। पृथुः। मृदुः। न्यंकादित्वात्कुत्वं। भृज्जति तपसा भृगुः। लंघिबंह्योर्नलोपश्च। लघुः। बालमूललघ्वलमं
गुलीनां वा लो रत्वमापद्यते। रघुर्नृपभेदः। बहुः। ऊर्णोतेर्नुलोपश्च। ऊरुः॥ सक्थि। महति ह्रस्वश्च। उरु महत्। श्लिषेः कश्च। श्लि
ष्यतीति श्लिकुः। भृत्यः। उद्यती ज्योतिश्च। आङ्परयोः खनिशृभ्यां डिच्च। आखनतीति आखुः। परं शृणातीति परशुः। एषो
दरादित्वात् हकारलोपः। पर्शुरपि। हरिमितयोर्द्रुवः। हरिभिर्द्रूयत इति हरिद्रुर्वृक्षः। मितं द्रवतीति मितद्रुः समुद्रः। बा
हुलकात्केवलादपि। द्रवत्यूर्ध्वमिति द्रुः वृक्षः। शाखाश्च। तद्वान् द्रुमः। खरुशंकुपीयुनीलं
गुलिगु। पंचैते कुप्रत्ययान्ता निपात्यन्ते। खनतेः रेफश्चान्तादेशः। खरुः कामः। क्रूरो मूर्खः खर्वः
श्वश्च। शंकुर्नाकीलशरस्मरः। पिबतेरीत्वं युगागमश्च। पीयुयसः। कालः। सुवर्णं

सि. कौ.

॥२५॥ च॥ निपूर्वा द्गगिगतावस्मात्कुः॥ नेर्दीर्घश्च॥ नीलंगुः क्रिमिविशेषः॥ सृगालश्च॥ नीलांगुरिति पाठांतरं॥ तत्र धा

तोरपि दीर्घः॥ लगे संगे अस्य अत इत्वं च॥ लगतीति लिगुश्चित्तं॥ लिगुर्मूर्खः॥ मृगय्वादयश्च॥ एते कुप्रत्ययां

तानि पात्यंते॥ मृगं यातीति मृगयुः॥ व्याधः॥ देवकुर्धार्मिकः॥ मित्रयुर्लोकयात्राभिज्ञः॥ आकृतिगणोयं॥

मंदिवाशिमथिचतिचंक्यंकिभ्य उरच्॥ मंदुरा वाजिशाला॥ वाशुरा रात्रिः॥ मथुरा॥ चतुरः॥ चंकुरो रथः॥

अंकुरः॥ खर्जूरादित्वादंकूरोपि॥ व्यथेः संप्रसारणं किच्च॥ विथुरश्चोररक्षसोः॥ मकुरदर्दुरौ॥ मकु

रो दर्पणः॥ बाहुलकान्मकुरोपि॥ दृ विदारणे॥ धातोर्द्विर्वचनं अभ्यासस्य रुक् दीर्घोपश्च॥ दर्दुरस्तोयदे भे

के वाद्यभांडाद्रिभेदयोः॥ दर्दुरा चंडिकायां स्याद्ग्रामजालेपि तु दर्दुरमिति विश्वः॥ मद्गुरादयश्च॥ उरजंता ॥२५॥

निपात्यंते॥ माद्यतेर्गुक्॥ मद्गुरो मत्स्यभेदः॥ कर्बुर वर्णे॥ कर्बुरो नाग आगमः॥ कर्बुरश्चित्र रक्षसो॥ बध्नातेः खर्जूरा

दित्वाद्दूरोपि॥ बभ्रूर बंधुरो स्यान्नताननम्रसंकेदरयोस्त्रिष्वथ धुरे तिरंति देवः॥ कोकतेर्वा कुक्॥ कुक्कुरः॥ कुकुरः॥

असेरुरन्॥ असुरः॥ प्रज्ञाद्यण्॥ आसुरः॥ मसेश्च॥ पंचमे पादे मसेरूरन्निति वक्ष्यते॥ मसुरा मसुरा व्रीहिप्रभेदे

पण्ययोषिति॥ मसूरा मसुरा वा नाविश्यान्नी हिप्रभेदयोः॥ मसूरी पादयोरोस्या तदुपधाने पुनःपुमान्॥ मसूरा

मसुरो दावितिविश्वः॥ शावशेराप्तौ॥ आशुरिति आश्चर्ये॥ श्वशुरः॥ पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्त्वपिता तयोरितमम्

रः॥ अविमह्योष्टिषच्॥ अविषः॥ महिषः॥ अमेर्दीर्घश्च॥ आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि॥ रुहे रंद्धि ॥ग॥

श्च॥ रंकुरोवरौहिषाः॥ रोहिषाम्भेदः स्याद्रोहिषं च तृणं मतमिति संसारावर्तः॥ तवेर्णिद्वा॥ तवेति सौत्रो

धातुः॥ तविषः ताविषः॥ पावश्यौ स्वर्गे च॥ स्त्रियां तविषी॥ नदी देवकन्या भूमिश्च॥ तविषी बलमिति वेदभाष्यं॥ नञि व्य

धेः॥ अव्यथिषोऽब्धिसूर्ययोः॥ अव्यथिषी धरा रात्र्योः॥ किलेर्बुक्॥ किल्बिषं॥ इषिमदिमुदिखिदिछिदिभिदिमं

दिचंदितिमिमिहिमुहिमुचिरुचिरुधिबंधिशुषिभ्यः किरच्॥ इषिरोऽग्निः॥ मदिरा सुरा॥ मुदिरः कामुकः कान्त

योरतिविभ्रमे दिन्यो॥ खिदिरश्चंद्रः॥ छिदुरोसिकुठारयोः॥ भिदिरं वज्रं॥ मंदिरं गृहं॥ चंदिरौ चंद्रहस्ति

नो ॥ तिमिरं तमोऽक्षिरोगश्च ॥ मिहिरः सूर्यः ॥ मुहिरः ॥ काम्यसभ्ययोः ॥ मुचिरो दाता ॥ रुचिरं ॥ रुधिरं ॥ बधिरः ॥ शुष
 शोषणे ॥ शुषिरं छिद्रं ॥ शुष्कमित्यन्ये ॥ अशोणित ॥ आशिरो वह्निरक्षसोः ॥ अजिरशिशिरशिथिलस्थिरस्फिरस्थविर
खदिराः ॥ अजेर्वीभावाभावः ॥ अजिरमङ्गणं ॥ शशेरुपधाया इत्वं ॥ शिशिरं स्यादृतौ भेदे तुषारे शीतलेऽन्यवत् ॥ श्र
थ मोचने ॥ उपधाया इत्वं ॥ रेफलोपः ॥ प्रत्यये रेफस्य लत्वं ॥ शिथिलं ॥ स्थास्फायोरापोऽत्वे लोपः ॥ स्थिरं निश्चलं ॥ स्फिरं प्र
भूतं ॥ तिष्ठतेर्वुक् ऊरुत्वं च ॥ स्थविरः ॥ खदिरः ॥ बाहुलकात् शीङो वुक् ह्रस्वश्च ॥ शिबिरं ॥ सलिकल
निमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ॥ सलति गच्छति निम्नमिति सलिलं ॥ कलिलं ॥ अनि
लः ॥ महिला ॥ पृषोदरादित्वात् भद्रेऽलोपे ॥ भडिरिति सौत्रो धातुः ॥ भडिलः शूरसेवकौ ॥ भण्डिलो दूतः ॥
कल्याणं च ॥ शण्डिलो मुनिः ॥ पिण्डिलो गणकः ॥ तुण्डिलो मुखरः ॥ कोकिलः ॥ भविलो भव्यः ॥ बहुल
का कुटिलः ॥ कमेः पश्च ॥ कपिलः ॥ गुपादिभ्यः कित् ॥ गुपिलो राजा ॥ तिजिलो निशाकरः ॥ गु

हिलं वनं ॥ मिथिलादयश्च ॥ मथ्यन्तेऽत्र रिपवो मिथिला नगरी ॥ पथिलः पथिकः ॥ पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ॥
पतेरः पक्षी गन्ता च ॥ कठेरः कृच्छ्रजीवी ॥ कुठेरः पर्णाशः ॥ बाहुकभुन्मः ॥ गडेरो मेघः ॥ गुडेरो गुडकः ॥ दशेरो हिंस्रः ॥ कुबेरस्यो
पश्च ॥ कुबेरः ॥ दशेरस्त्र ॥ शातेर्मशत्रुः ॥ मूलेरादयः ॥ एरङ्गन्ता निपात्यन्ते ॥ मूलेरा ॥ जटी ॥ गुधेरो गोप्ता ॥ गुहेरो लोहघात
कः ॥ मुहेरो मूर्खः ॥ कबेरोतच्च पश्च ॥ कपोतः पक्षी ॥ भातेर्डवतुप् ॥ भातीति भवान् ॥ कठिचकिभ्यामोरन् ॥ कठोरः ॥ चकोरः ॥
किशोरादयश्च ॥ किंपूर्वस्य शृणातेष्टिलोपः ॥ किमोऽन्त्यलोपः ॥ किशोरः अश्वशावः ॥ सहोरः ॥ साधुः ॥ कपिगडिगण्डिकटि
पटिभ्य ओलच् ॥ कपीति निर्देशान्नलोपः ॥ कपोलः ॥ गडोलो गडोलो गुडकपर्यायौ ॥ कटोलः ॥ कटुः ॥ पटोलः ॥ मीनातेरू
रन् ॥ मयूरः ॥ स्यन्देः सम्प्रसारणं च ॥ सिन्दूरं ॥ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥ सिनोतीति सेतुः ॥ तनु
तेति तन्तुः ॥ गन्तुः ॥ मस्तु दधिमण्डं ॥ सच्यन्तेऽत्र सक्तुः ॥ अवतेः ओतुः ॥ जरत्वरत्सूदन्तमाद्या ओतुः ॥ सकर्मक इति मन्तु
बाहुलकात् ॥ ओतुः बिडालकः ॥ धातुः ॥ क्रोष्टा ॥ पः किच्च ॥ पिबतीति पितुः वह्निरादित्यश्चैव ॥ अर्तेश्च तुः ॥ अर्त्तुः ॥ ऋतुः ॥ स्या
चकितः ॥ क्रमः तुः ॥ स्त्री पुष्पकालयोः ॥ कमिमनिजनिगाभायाहिभ्यश्च ॥ एभ्यस्तुः स्यात् ॥ कन्तुः ॥ कन्दर्पचित्तयोः ॥

सि॰
सि॰ कौ॰

॥२७॥ मन्तुरपराधः॥ जन्तुः प्राणी॥ गातुः पुंस्कोकिले भृंगे गंधर्वे गायनेपि च॥ भातुः आदित्यः॥ यातुरध्वगकालयोः॥
रक्षसि क्लीबे॥ हेतुः कारणं॥ चायः किः॥ केतुर्ग्रहपताकयोः॥ आप्नोतेर्ह्रस्वश्च॥ अप्तुः शरीरं॥ वसेस्तुन्॥
वस्तु॥ आगारे णिच्च॥ वेश्म भूर्वास्तुरस्त्रियां॥ कृञः कतुः॥ क्रतुर्यज्ञः॥ एधिवह्योश्चतुः॥ एधतुः॥ पुरुषः॥ व
हतुरनड्वान्॥ जीवेरातुः॥ जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे॥ आतृकन्वृद्धिश्च॥ जीवेरित्येव॥ जैवा
तृकस्त्विंदुभिषगायुष्मत्सु कृशवले॥ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः॥ कर्षूः पुंसि करीषाग्नौ क
र्षूर्नद्यां स्त्रियं मता॥ चमूः॥ तनूः॥ धनूः शास्त्रं॥ सर्ज अर्जने॥ सर्जूः वणिक्॥ खर्ज व्यथने॥ खर्जूः पामा॥
मृजेर्गुणश्च॥ मर्जूः शुद्धिकृत्॥ वहो धश्च॥ वधूर्जाया स्नुषा स्त्रीषु॥ कषेश्छश्च॥ कच्छूः पामा॥ णित्क
सिपद्यर्तेः॥ कासूः शक्तिः॥ पादूश्चरणधारणी॥ आरूः पिंगलः॥ अणो डश्च॥ आडूः जलप्लवद्रव्यं॥ ॥२७॥
नञि लम्बेर्नलोपश्च॥ तुंब्यलाबूरुभे समे॥ कश्च एरङ् चास्य॥ कशब्दे उपपदे शृणातेरूः स्यादेरङ् चा

देशः॥ कशेरूस्तृणकंदे स्त्री॥ बाहुलकादुप्रत्यये कशेरुः क्लीबे पुंसि च॥ त्रो दुट् च॥ तरतेरूः स्यात्तस्य
दुट्॥ तर्दूः॥ दरिद्रातेर्यालोपश्च॥ इश्च आश्च यौ॥ तयोर्लोपः॥ दर्द्रूः॥ कुष्ठभेदः॥ नृतिशृध्योः कूः॥ नृ
तूः नर्तकः॥ शृधूरपाने॥ ऋतेरश्च॥ ऋदिति सौत्रो धातुः॥ ऋतः कूः॥ अमागमश्च॥ रन्तूर्देवनदी
सत्यवाक् च॥ अन्दूदृन्फूजम्बूकफेलूकर्कन्धूदिधिषूः॥ एते कूप्रत्ययान्ता निपात्यन्ते॥ अन्दूर्बन्धनं
दृभी ग्रन्थे॥ निपातनान्नुम्॥ दृन्फूः॥ अनुस्वाराभावोपि निपातनात्॥ सर्पे॥ दृन्फूः॥ जनेर्बुक् च॥ ज
म्बूः॥ जम्बूफलेस्य पसेके॥ बाहुलकाद्ध्रस्वोपि॥ जम्बुः॥ कफं लातीति कफेलूः श्लेष्मान्तकः॥ निपात
नादेत्वं॥ कर्कं दधातीति कर्कन्धूर्बदरी॥ निपातनान्नुम्॥ दिधिं धैर्यं स्यति लज्जातीति
दिधिषूः॥ पुनर्भूः॥ केचित्तु अन्दूं दृम्फूं जम्बूं कम्बूं इति पठन्ति॥ दृम्फूः लब्धक्लेशः॥ दृम्फूः सर्पजातिः
कम्बुर्मुक्॥ कम्बूः परद्रव्यापहारी॥ मृग्य्योरुतिः॥ मरुत्॥ गरुत्पक्षः॥ ग्रो मुट् च॥ गिरतेरु

क

४ (कमठः कच्छपे पुंसि भांडभेदे नपुंसकमिति मेदिनी ॥ ४

॥२८॥ रूतिस्तस्य च मुट् । गर्मुत्सुवर्णं तृणविशेषश्च । हृषेरुलच् । हर्षुलो मृगकामिनोः । बाहुलकाद्घाटतेः
चटुलं शोभनं । हसरुहियुषिभ्य इतिः । हरित् कुम्भित् तृणजातिविशेषश्च ॥ सरित् नद्यो रोहित् मृगविशे
षस्य स्त्री । युष इति सौत्रो धातुः । अश्मस्य रोहित् । पुरुषस्य योषिदिति माघ्यं । ताडेर्णिलुक् च । ताडपती
तितडित् विद्युत् ॥ शमेर्ढः ॥ बाहुलकादित्संज्ञाऽण्यादेशाः रद्दन ॥ शण्ढः क्लीबः ॥ कमेरठः ॥ कमठः ॥ बाहुलकाज्जरठः ॥
रमेर्वृद्धिश्च ॥ रामठं हिंग्यु ॥ शमेः खः ॥ शंखः ॥ कणेष्ठः ॥ कंठः ॥ कलस्तृपश्च ॥ तृपतेः कलन्प्रत्ययः ॥ चात्तृफलेः ॥
तृपला लता ॥ तृफला फलत्रिके । शपर्बश्च ॥ शबलः ॥ वृषादिभ्यश्चित् ॥ वृषलः ॥ पललं ॥ बाहुलकाद्दुण ॥ सरलः ॥
तरलः ॥ कमेर्बुक् ॥ कंबलः ॥ मुसखंडने ॥ मुसलं ॥ लंगेर्वृद्धिश्च ॥ लांगलं ॥ कुठिकत्रिकोतिभ्यः प्रत्ययस्य मुट् ॥ ॥२८॥
कुथलः ॥ कुउरपि ॥ कुशलः ॥ करमलं ॥ बाहुलकाद्दुणः ॥ कोमलं ॥ मृजेष्टिलोपश्च ॥ मलं ॥ चुपेरचोपधायाः ॥
चपलं ॥ शकिशम्योर्नित् ॥ शाकलं ॥ शामलं ॥ छोदुग्घस्वश्च ॥ छगलः ॥ प्रज्ञादित्वाच्छागलः ॥ मयंत

ममंतात् डः ॥ रंडः । रंडा । खंडः । मंडः । वंडः । चंडः । छिन्नहस्तः । अंडः । बाहुलकात्सत्वाभावः । षंडः । संघातः । तालव्या
दिरित्यपरे । गंडः । वंडः । पंडः क्लीबः । पेडा बुद्धिः । फंडः प्रज्ञादित्वात्फांडं । कादिभ्यः कित् ॥ कककगोरिभ्योडः
कित् । कुंडं कांडं । गुडः गुडः । घुणभ्रमणे । घुंडो भ्रमरः । स्थाचतिमृजेरालच्चालञ्जालीयचः । तिष्ठतेरालच्
स्थालं । स्थाली । चतेर्वालञ् । चात्वालः । मृजेरालीयच् । मार्जालीयो बिडालः । पतिचंडिभ्यामालञ् ।
मातंगः पातालं । चंडालः ॥ प्रज्ञादित्वाद्रणि चांडालो पियेके । तमिविशिबिडिमृणिकुलिकपिपलिपंचिभ्यः कालन् ॥
तमालः ॥ विशालः ॥ बिडालः ॥ मृणालं ॥ कुलालः ॥ कपालं ॥ पलालं ॥ पंचालाः ॥ पतेरंगच् पक्षिणि ॥ पतंगः ।
तरत्यादिभ्यश्च ॥ तरंगः ॥ लवंगं ॥ बिडादिभ्यः कित् ॥ विडंगः । मृदंगः । कुरंगः । बाहुलकाद्दुलंच । स्ववओर्वृद्धि
श्च । सारंगः । वारंगः । खङ्गादिमुष्टिः । गन्गम्यद्योः । गंगा । अङ्गः । पुरोडाशः । छापूखडिभ्यः कित् । छागः । पू
गः । खङ्गः । बाहुलकात् षिङ्ग अनादरे । गन् सत्वाभावश्च । षिङ्गः स्वरलः । षिङ्गैरगद्यतससंभ्रममेवमेके

सि॰कौ॰ तिमाधः॥ भ्रमः किदुञ्च भूओगनूकिल्स्यातूतस्यनुद्धा भंगः षिङ्गालिधूम्याया॥ श्रृणातेह्रस्वश्च॥ श्रृंगं॥ गणश्रृ
कुनौ॥ उदेदिसनुवर्ततेः शार्ङ्गं॥ कदियोर्गगो॥ कद्रु॥ गर्गः॥ अंडन् कृसृभृवृभ्यः॥ करंडः॥ सरंडः पक्षी॥ भरंडः
स्वामी॥ वरंडो मुखरोगः॥ श्रृदृभसोदिः॥ शारत्॥ दरत् देशस्य कूलयोः॥ भसज्जघनं॥ दृणातेः पुग्घ्रस्वश्च॥ दृ
२१॥ षत्॥ त्यजितनियजिभ्योडित्॥ स्यद्॥ तद्॥ यद्॥ सर्वादयः॥ एतेस्तुट्च॥ एतद्॥ सर्तेरडिं॥ सरड्॥ स्याद्धा
तमेघयोः॥ वेदभाष्ये तु याभिः कुशानुमिति मंत्रे सरड्भ्यो मधुमक्षिकाभ्य इति व्याख्यातं॥ लंघेर्नलोपश्च॥
लघट् वायुः॥ पारयतेरजिः॥ पारक् स्कुवर्णे॥ प्रथः किस्संप्रसारणं च॥ पृथक्॥ स्वरादिपाठादव्ययत्वं॥ भि
यः षुग्घ्रस्वश्च॥ भिषक्॥ युष्मसिभ्यामदिक्॥ युषूसौत्रो धातुः॥ युष्मद्॥ अस्मद्॥ त्वं॥ अहं॥ अर्तिस्तुसुहु ॥२१॥
सृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्॥ एभ्यश्च तुर्दश्राभ्यो मन्॥ अर्मश्च क्षुरोगः॥ स्तोमः संघातः॥ सोमः॥
होमः॥ सर्मो गमनं॥ धर्मः॥ क्षेमं॥ क्षोमं॥ प्रज्ञाद्यणि क्षौमं च॥ भामआदित्यः॥ यामः॥ वामः॥ शोभनदुष्टयोः॥ पद्मं॥ यक्ष्म

पूजायां॥ यक्ष्मो रोगराजः॥ नेमः॥ जहातेः सन्वदालोपश्च॥ जिह्मः कुटिलमंदयोः॥ अवतेष्टिलोपश्च॥ मन्प्रत्ययस्यायंटि
लोपः नप्रकृतेः॥ अन्यथा डिदित्येव ब्रूयात्॥ ज्वरत्वरेति ऊठ्॥ तयोर्दीर्घे कृते गुणः॥ चादिपाठादव्ययत्वमित्युज्ज्वल
दत्तस्तन्न तेषामसमर्थत्वात्॥ वस्तुतस्तु स्वरादिपाठादव्ययत्वं॥ अवतीति ओम्॥ ग्रसेराच॥ ग्रामः॥ अविसिवि
सिशुषिभ्यः कित्॥ ऊमं नगरं॥ षिवूतंतुसंताने॥ स्यूमो रश्मिः॥ सिमः सर्वः॥ शुष्ममग्निसमीपयोः॥ इषियुधीन्धिदसिश्या
धूसूभ्यो मक्॥ इष्मः कामवसंतयोः॥ ईषीति पाठे दीर्घादिः॥ युध्मः शरो योद्धा च॥ इध्मः समित्॥ दस्मो यजमानः॥ श्या
मः॥ धूमः॥ सूमोंतरिक्षं॥ बाहुलकाद्दीर्घे ग्रणं॥ युजिरुचितिजां कुश्च॥ युग्मं॥ हंतेर्हिच॥ हिमं॥ भियः षुग्वा॥ भीमो भी
ष्मः॥ घर्मः॥ घृधातोर्मक् गुणश्च निपात्यते॥ ग्रीष्मः॥ ग्रसतेर्निपातोऽयं॥ प्रथेः षिवन् संप्रसारणं च॥ पृथिवी॥ षवन्निते
के॥ पृथवी॥ पृथ्वी इति शार्ङ्गरवादिपाठः॥ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्॥ अश्वः॥ प्रुषस्नेहनादौ॥ प्रुष्वः स्या
हतुसूर्ययोः प्रुष्वा जलकणिका॥ लट्वा पक्षिभेदः फलं च॥ कण्वपापं॥ बाहुलकादित्वेकिण्वमपि॥ खट्वा॥ विश्वं॥ इणशी

॥३०॥

प्यांवन् ।एवोगंता॥प्रेचएवामरुतः।अस त्वेनिपातोयं।शेवंमित्रायवरुणाय॥सर्वेनिघृष्वरिष्वलष्वशिवपद्मप
हृष्वाअतंत्रे।अकर्त्तर्येतिनिपात्यंते।सरतमनेनविश्वमितिसर्वं।निपूर्वात्घृषेगुणाभावोपि।निघृष्यतेनेन
निघृष्वः।खुरः।रिष्वोहिंस्त्रः।लष्वोनर्तकः।लिष्वइत्यन्ये॥तत्रोपधायाइत्वमपि।शेतेऽस्मिन्सर्वंशिवः
शंभुः।शीङोह्रस्वत्वं।पद्मोरथः।भूलोकश्च।महृष्यतेइतिप्रहृष्टः।ह्वेञ्आकारवकारलोपः॥जहातेरालोपोवा॥ई
षेर्वन्॥इषआचार्यः॥इषइत्यन्ये॥अतंत्रेकि॥सेर्त्तीसारकः॥बाहुलकात्हृस्वत्वे॥हृस्वः॥शेवयहृजिह्वा
ग्रीवाप्वामीवाः॥शेवइसंतोदानार्थे॥यांसनेनयह्वः॥ह्वःस्वोहुगागमश्च॥लिहंत्यनयाजिह्वालकारस्येजः॥गु
णाभावश्च॥गिरंत्यनयाग्रीवा॥इडागमश्च॥आप्नोतीत्यप्वाःवियुः॥मीवाउदरक्रिमिः॥वायुरित्यन्ये॥कृगृशृदृ
भ्योवः॥कर्वःकामः॥आरवुश्च॥गर्वः॥शार्वःदर्वीराक्षसः॥कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः॥यौ ॥३०॥
तिकवा॥वृषावृद्रः॥तक्षा॥राजा॥धन्वामरुः॥धन्वशारासनं॥द्युवासूर्यः॥प्रतिदिव्यत्यस्मिन्प्रतिदि

वादिवसः॥सप्यशूभ्यांतुट्॥सप्तअष्ट॥नञिजहातेः॥अहः॥श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्
मज्जन्अर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्इति।एतेत्रयोदशाकनिन्नंतानिपात्यंते॥श्वयप
तीतिश्वा॥उक्षा॥पूषा॥प्लिहगतौ॥इकारस्यदीर्घत्वं॥प्लेहतीतिप्लीहाकुक्षिव्याधिः॥क्लिदूआर्द्रीभावे॥क्लि य
द्यतीतिक्लेदाचंद्रः॥स्निह्यतीतिस्नेहा॥स्निह्यतेर्गुणः॥सुहृच्चंद्र[illegible]श्च॥मुह्यत्यस्मिन्नाहतेमूर्द्धा॥
म्नेहेरूपधायादीर्घः॥धोरंतादेशोरमागमश्च॥मज्जत्यास्थिषुमज्जास्थिसारः॥अर्यपूर्वान्मो
ङः अर्यमा॥विश्वंप्साति विश्वप्साग्निः॥परिजायतेपरिज्माचंद्रोग्निश्च॥जनेरुपधालोपो
मश्चांतादेशः॥मातरिअंतरिक्षेश्वयतीतिमातरिश्वा॥धातोरिकारलोपश्च॥महपूजा
यां॥हस्यघःवुगागमश्च॥मघवाइंद्रः॥इत्युणादिषुप्रथमःपादः॥कृहृभ्यामेणुः॥करेणुः॥
हरेणुर्गंधद्रव्यं॥हनिकुषिनीरमिकाशिभ्यःक्थन्॥हथोविषण्णः॥कुष्ठः॥नीथोनेता॥

सप्तम्याअलुक् २

उषिकुषिगार्तिभ्यस्थन्॥ ओष्ठः॥ कोष्ठं॥ गाथा॥ अर्थः॥ बाहुलकात्
रथः॥ काष्ठं॥ अवेभृञः॥ अवभृथः॥ उषिकुषिगार्तिभ्यस्थन्॥ ओष्ठः॥ जरूथं मांसं॥ वरूथो रथगुप्तिः॥ पातृतुदिवचिरि
॥३१॥ शोथः॥ सर्तेर्णित्॥ सार्थः समूहः॥ जरतेरभ्यामूथन्॥ जरूथं मांसं॥ वरूथो रथगुप्तिः॥ पातृतुदिवचिरि
चिसिचिभ्यस्थक्॥ पीथो रविः घृतं पीथं॥ तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु॥ अवतारर्षिजुष्टां
भस्त्रीरजःस्वचविश्रुतमिति॥ विश्वः॥ तुंग्निः॥ उक्थं साम भेदः॥ रिक्थं॥ बाहुलकात् ऋचेरपि॥ रिक्थमृक्थं
धनं वस्कः॥ सिक्थं॥ अर्तेर्निरि॥ निर्ऋथः॥ साम॥ निशीथगोपीथावगथाः॥ निशीथो रात्रः॥ रात्रिमात्रेच॥ गो
पीथं तीर्थं॥ अवगथः प्रातः स्नातः॥ गश्चोदि॥ उद्गीथः साम्नो भागविशेषः॥ समीणः॥ समिथः वह्निः सं
ग्रामश्च॥ तिथपृष्ठगूथयूथप्रोथाः॥ तिजेर्जलोपः॥ तिथो नलः कामश्च॥ पृष्ठं॥ गूथं विष्ठा॥ यूथं समूहः॥
प्रोथमस्त्रियां तुरंगस्य॥ प्रोथः॥ प्रथितः उच्यते॥ स्फायितंचिवंचिशकिक्षिपिक्षुदिसृपितृपिदृपिवंधु
दिश्विनिरत्यजिनीपदिमदिम्कदिखिदिछिदिभिदिमंदिचंदिदहिदसिदंभिवसिवाशिशीङ्हसि ॥३१॥
सिधिशुभिभ्योरक्॥ द्वात्रिंशतोरक् स्यात्॥ वलियलोपः स्फारः॥ न्यंक्वादिभ्यः कुत्वं॥ तक्रं॥ वक्रं॥ शक्रः॥

क्षिप्रं॥ क्षुद्रः॥ सृप्रश्चंद्रः॥ तृप्रः पुरोडाशः॥ दृप्रो बलवान्॥ वंध्रः पूजकः॥ उंदि॥ उद्रो जलचरः॥ श्वि
त्रं कुष्ठं॥ रत्रो रिपो धने ध्वांते शैले चक्रे चदानवे॥ अजेर्वी वीरः॥ नीरं॥ पद्रो ग्रामः॥ मद्रो हर्षः शेश
भेदश्च॥ मन्द्रा प्रसयकारिणी॥ खिद्रो रोगो दरिद्रश्च॥ छिद्रं॥ भिद्रं॥ वज्रं॥ मेन्द्रः चंद्रः॥ पचाद्यचि
चंदोपि॥ हिमांशुश्चंद्रमाः चंद्रः॥ शशीचंद्रो हिम स्फातिः॥ दह्रोग्निः॥ दस्रः स्वर्वैद्यः॥ दम्भः समु
द्रः॥ स्वस्पेच॥ वस्रः संप्रसारणं॥ न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनां॥ रेफपरस्य सका
रस्य सृप्यादीनां सवादीनां च मूर्द्धन्यो न स्यात्॥ पूर्वपदादिति प्राप्तः प्रतिषिध्यते इति वृत्तिर्भु
यो भिप्रायो॥ तेन शासिवसिघसीनांति प्राप्तमपि न॥ उस्रो रश्मिः॥ उस्रा गौः॥ वाश्रो दिवसः॥ वाश्रं
मंदिरं॥ शीरो जगरः॥ हस्रो मूर्खः॥ सिध्रः साधुः॥ शुभ्रं॥ मुसेरक् बाहुलकात्॥ मुस्रं अश्रु॥
चकिरम्योरुच्चोपधायाः॥ शुक्रेमन्त्ररुच्यं॥ रुम्रो किरणः॥ वौकसः॥ विकुस्रश्चंद्रः॥ अमि

ताम्रो दीर्घश्च ॥ आम्नं ॥ ताम्रं ॥ निंदेर्नलोपश्च ॥ निद्रा ॥ अर्देर्दीर्घश्च ॥ आर्द्रं ॥ शुचेर्दश्च ॥ शूद्रः ॥ दरीणो
लोपश्च ॥ दुःखेन वृत प्राप्यत इति दूरं ॥ कृतश्छ कृच ॥ कृच्छ्रं ॥ क्रूरः ॥ रादर्णो लुकन् ॥ रोदयतीति रु
॥२२४ द्रः ॥ बहुलमन्यत्रापि संज्ञाछंदसोः ॥ णिलुगिस्येव ॥ वांति पर्णत्रुपो वाताः ॥ ततः पर्णमुचापरेनत
पर्णकं गावी तीततादेवः प्रवर्षति ॥ जोरीन् ॥ जीराणुः ॥ अश्चेस्यके ॥ स्फसूधागृधिभ्यः क्रन् ॥
स्फुरः ॥ सूरः ॥ धीरः ॥ गृध्रः ॥ शुसिचिमीनां दीर्घश्च ॥ शुः सौत्रः ॥ शूरः ॥ सीरं ॥ चीरं ॥ मीरः समुद्रः ॥
वा विधे ॥ वीध्रं विमले ॥ ऋधिवपिभ्यां रन् ॥ वध्रं चर्म ॥ वप्रः प्राकारः ॥ ऋज्रेंद्राग्रवज्रविप्रकु
ब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवत्रेरामालाः ॥ रन्नेता ऊनविंशतिः ॥ निपात्यंते ॥२२॥
दुर्णाभावः ॥ ऋज्रो नायकः ॥ इंद्रः ॥ अंगेर्नलोपः ॥ अग्रं ॥ वज्रो स्त्रीहीरकपवो ॥ डुवपृडु
पधाया इत्वं ॥ विप्रः ॥ कुं बिचकयोर्नलोपः ॥ कुब्रमरण्यं ॥ कुब्रं कम्बं ॥ क्षुरविस्केरवने ॥ रेफलोपः ॥

अगुणः ॥ क्षुरः ॥ खुरछेदने ॥ रलोपो गुणाभावश्च ॥ खुरः ॥ भंदेर्नलोपश्च ॥ भद्रं ॥ उच समवाये ॥ चस्य गः ॥ उग्रः ॥
भिभी ॥ भेरी ॥ पक्षे लः ॥ भेलो जलतरणद्रव्यं ॥ शुचेश्च स्यकः ॥ शुक्रः ॥ पक्षे लः ॥ शुक्लः ॥ गुङ् वृद्धिः ॥ गौरोरु
णो सितपीते ॥ वनसंभक्तौ ॥ वन्नो विभागी ॥ इणो वर्णाभावः ॥ इरामद्येत्ववारिणि ॥ मामाने ॥ माला ॥ समि
कसउकन् ॥ कसगतौ ॥ सम्यक् संतिपलायते जन अस्मादिति संकसुको दुर्जनः ॥ आस्थिरश्च ॥ पचिन
शोरणुकन्कनुमौ च ॥ पचेः कः ॥ पाकुकः सूपकारः ॥ नशेर्नुम् ॥ नंशुकः ॥ भियः क्रुकन् ॥ भीरुकः ॥ क्रुकन्
शिल्पिसंज्ञयोरपूर्वस्यापि ॥ रञ्जकः ॥ इक्षुकुट्टकः ॥ चरकः ॥ चष भक्षणे ॥ चषकः ॥ शुनकः ॥ भषकः ॥
रमेस्त्वश्च लोपः ॥ रमको विलासी ॥ लमकः ॥ जहातेर्द्वे च ॥ जहकः ॥ त्यागी कालश्च ॥ ध्मो धमश्च ॥ ध
मकः कर्मकारः ॥ हनो वधश्च ॥ वधकः ॥ बहुलमन्यत्रापि ॥ कुहविस्मापने ॥ कुहुकः ॥ कृतकं ॥ कृषेर्वृ
द्धिश्चोदीच्यां ॥ कार्षकः कर्मकारः ॥ कृषकः ॥ उदकं च ॥ प्रपंचार्थे ॥ वृश्चिकृषोः किकन् ॥ वृश्चिकः ॥ क

प्राकषिकः। परदारोपजीवी॥ मुषेर्दीर्घश्च॥ मूषिकः। आखुः

॥श्रीः॥ विकः। प्राङ्पणि कषः। प्रापणिकः। पण्यविक्रयी। प्राकषिकः। परदारोपजीवी॥ आङि पणिपनिपतिखनि
स्यमः सम्प्रसारणं च॥ चाद्दीर्घः। सीमको वृक्षभेदः। क्रियइकन्॥ क्रेयिकः क्रेता॥ आङि पणिपनिपतिख
नि॥ आपणिकः॥ आपनिकः। नीकः ईद्रनीलः। किरातश्च॥ आपलिकः॥ श्येनः देवायनश्च॥ आ

॥३३॥ खन्यिकेस्मृषिकावराहश्च॥ श्यास्त्याहृञविभ्य इनच्॥ श्येनः॥ स्त्येनः॥ हरिणः॥ अविनो धर्ययुः॥ वृजेः कि ण:
च॥ वृजिनं॥ अजरजब। वीभावबाधना धर्म॥ अजिनं॥ बेहृत्तमन्यत्रापि॥ कठिनं॥ नलिनं॥ मलिनं॥ कुठिनं॥
घर्ति॥ पत्यकुषि हिनं॥ दिवसोपि हिनं॥ दुहक्षिभ्यामिनन्॥ द्रविणं॥ दक्षिणः॥ दक्षिणा॥ अर्त्तेः किरिच्च॥ दरि
णं रूप्यं॥ वेणिनुत्याहृस्वश्च॥ विपिनं॥ तुहिनं॥ नलिपुलिभ्यां च॥ नलिनं॥ विरत्ने स्लोके स्वच्छपतलिनं त्रिषु॥ पु
लिनं॥ गर्वेर्नतउच्च॥ गौरादित्वान्ङीष्॥ गुर्विणी गर्भिणी॥ रुहेश्च॥ रोहिणः॥ महेरिनणच॥ चाहिनन्॥ ॥३३॥
माहिनं॥ महिनं राज्यं॥ क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोसंप्रसारणं च॥ वाक्॥ प्राट्॥ श्रीः॥ स्रुव स्रुता
घृतादिकमिति स्रुः यज्ञोपकरणं॥ द्रुः हिरण्यं॥ करप्रूः॥ कामरूपिकीरश्च॥ जूराकोचरो सरस्वत्यां पिशा

हस्वेकृते अपत्ने दीर्घः ३

प्रसौं
च्यां जवनेस्त्रियां॥ आप्नोतेर्ह्रस्वश्च॥ आपः॥ अपः॥ अद्भिः॥ अप्सु॥ परौव्रजेः षः पदान्ते॥ व्रजेः क्विप् दीर्घो च
स्तःपदान्तेलुषश्च॥ परिव्राट्॥ परिव्राड्॥ परिव्राजौ॥ हुवः श्लुवच्च॥ जुहूः॥ स्रुवः कः॥ स्रुवः॥ चिकः॥ इकार
उच्चारणार्थः॥ कइदः॥ कृत॥ स्कः॥ कस्के वचस्त्वं वृश्चसंभृद्धि॥ तनोतेरनश्च वः॥ तनोतेश्चिकृ॥ प्रत्ययोपोत्यकः
रादेशश्च॥ लकः॥ ग्लानुदिभ्यां डौः॥ ग्लौः॥ नौः॥ चिरव्ययं॥ उरित्येव॥ ग्लौः करोति॥ कृञ्नेज्जेतेडतिसिद्धे निय
माथमिदं॥ उणादिडौ प्रत्ययालः॥ च्यन्त एवेति॥ रातेडैः॥ गोर्नादिसि बलीवर्दे किरणक्रतुभेदयोः॥
यणिनि स्त्रीदुस्याहिशिभोरत्यां भूमौ च स्त्र सुरभौ विपि॥ न स्त्रियां स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु॥ बाहुल गवि ६
विग्रा ध कात घुतेर पिडो॥ घो॥ स्वर्गो तरक्षयो॥ भमेश्च डूः॥ चाक्रमः॥ अग्रेगूः॥ दमेडोसि॥ दोः॥ दोषो॥
पणेरिज्यादेश्च वः॥ वणिक्॥ स्वार्थे ऽण्॥ नैगमो वाणिजो वणिक्॥ वशः कित्॥ उशिक्॥ स्नो घृतेपि च॥ भृ
अउच्च॥ भुरिक् भूमिः॥ जसिसहोरुरिन्॥ जसुरिवज्रं॥ सहुरिरादित्यः॥ पृथिवी च॥ सुयुरुवृञो युच्॥

॥ सि०कौ० सवनश्चंद्रमाः॥ पवनः। रवणः। कोकिलः। वरणः। अशोरशूच अश्नोतेर्युच स्यात् धरशादेशश्च॥ रश-
नाकांची॥ जिह्वावाचीतु दंत्यसकारवान्॥ उंदेर्नलोपश्च॥ ओदनः॥ गमेर्गश्च॥ गमेर्युच्स्यात् गश्चांतादेशः॥ गगनं॥
बहुलमन्यत्रापि॥ कच्च स्यात्॥ स्यंदनः॥ रोचना॥ रंजेः क्युन्॥ रजनं॥ भूसूधूभ्रस्जिभ्यश्छंदसि॥ भुवनं॥ स्कंध-
॥३४॥ नआदित्यः॥ धवनोवायुः॥ निधुवनं रतं॥ भ्रज्जनमंबरीषं॥ कृपृवृजिमंदिनिधाञः क्युः॥ किरणः॥ पुर-
णः समुद्रः॥ वृजनमंतरिक्षं॥ मंदनं स्तोत्रं॥ धनिनं॥ धृषेर्धिषचसंज्ञायां॥ धिषणोगुरुः॥ धिषणाधीः॥ वर्तमाने पृषद्बृह-
न्महज्जगच्छतृवच्च॥ अतिप्रत्ययांताः॥ पृषुसेचने॥ गुणाभावः॥ बृहत्॥ महत्॥ गमेर्जगादेशः॥ जगत्॥ संश्चत् एषंति॥
तृपद्वेहत्॥ एते निपात्यंते॥ पृथक्करणं शात्रवभेदाव निरस्तस्यार्थं॥ संचिनोतेः कः इकारलोपः॥ संश्चत् कुहकः॥ तृपत् छ-
त्रं॥ विपूर्वाद्धेतष्टिलोपः॥ रुत एतच्च॥ वेहत् गर्भोपघातिनी॥ छंदस्यसानच् शुभूभ्यां॥ शवसानः पंथाः॥ जरसानः पुरु- ॥३४॥
षः॥ ऋंजिवृधिमंदिसहिभ्यः कित्॥ ऋंजसानो मेघः॥ वृधसानः पुरुषः॥ मंदसानो ऽग्निः॥ जीवश्च॥ सहसानो यज्ञः मयू-
रश्च॥ अर्तेर्गुणः शुट् च॥ अर्शसानो ऽग्निः॥ सम्यानच् स्तुवः॥ संस्तवानो वाग्मी॥ युधिबुधिदृशः किच्च॥ युधानः॥ बुधानः॥

दृशानः लोकपालः॥ हुरेः सनो लुक् च लोपश्च॥ जुहुराणः चंद्रमाः॥ श्वितेर्दश्च॥ शिश्विदानः पुण्यकर्मा॥ सुसृत्वौ
शासिक्षहादिभ्यः संज्ञायां चानिटः॥ ऊंसादिभ्यः श्वेतादिभ्यश्चक्रमात्॥ स्र न्तुचौ स्तः तौचानिटौ॥ शंस्ता॥ सोता॥
शंस्तारौ॥ शंस्तारः॥ क्षदिर्हिंसायां धातुः॥ शाकलीकरणे भक्षणेच॥ अबुदाशत्॥ एवमेव क्षतारं॥ इति मंत्रशाल॥ उक्षाणंवावे-
हतं श्वाक्षदंतेरविज्ञात्स्यणात्र॥ छात्रास्यात्सार्थौ द्वाथवै श्यायामपिसूर्जे॥ बहुलमन्यत्रापि॥ मनु॥ मंता॥ हन्॥ हंता॥
इत्यादि॥ नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ॥ नपतेस्त्वेन नप्ता॥ पौत्रो दौहित्रश्च॥ नयतेः षुग्गुणश्च॥
नेष्टा॥ त्विषेरितोत्वं॥ त्वष्टा॥ होता॥ पोता॥ भ्राजेर्नलोपः॥ भ्राता॥ जायां माति जामाता॥ मानपूजायां नलोपः॥ माता॥
पातेराकारस्यत्वं॥ पिता॥ दुहेस्तृन् टुक् गुणाभावश्च॥ दुहिता॥ स्वावसेः॥ स्वसा॥ पतेर्डतिश्च॥ याता॥ भार्या
स्तुभ्रातृवर्गस्य यातरः स्युः परस्परं॥ नमिचंनंदेः॥ तेनं हृतीति मनंदः॥ ऋदर्तेर्डिः॥ नीञ्कवर्न नरः लोके॥ देवरो
ननांदातु स्वसा पत्युर्ननंदा नंदिनीच सा इत्यमरः॥ दिवेर्ऋः॥ देवा॥ देवरः॥ नयतेर्डिच्च॥ ना॥ नरो॥ न-

सि॰ कौ॰ सर्वेश्वरसारथिः॥ सव्येष्टरो॥ सव्येष्टर॥ नि॰

र॥ सर्वेस्यछन्दसि॥ अंबाबे सत्रस्थ॥ स्थिनस्थूणा॥ कपसंख्यानं॥ सव्येष्ठासारथिः॥ सव्येष्टरो॥ सव्येष्टरः॥
र॥ सवेस्यश्छंदसि॥ अंवावे सत्रस्था॥ स्थिन्स्थूणा॥ अरणिरग्नेर्योनि॥ सरणिः॥ धरणिः॥ धमनिः॥
अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः॥ अद्द भ्योनिप्रत्ययः स्यात्॥ अरणिरग्नेर्योनि॥ आदिश्शुपेः सनश्छंदसि॥ आशुश्रक्ष
३५ अमनिः गतिः॥ अशनिः॥ अवनिः॥ तरणिः॥ बाहुलकात्रजनि॥ अतेर्मुनृा॥ अमनिरग्निः॥ रतेश्च॥ वर्त्तनिः॥ गोवर्द्धन
णिः॥ अग्निर्वालश्च॥ कृषेरादेश्चवः॥ चर्षणिर्जनिः॥ अतेर्मुनृा॥ अमनिरग्निः॥ रतेश्च॥ वर्त्तनिः॥ गोवर्द्धन
णिः॥ अग्निर्वालश्च॥ कृषेरादेश्चवः॥ चर्षणिर्जनिः॥ अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः॥ सर्पिः छादिश्छर्दि
स्क॥ चकारान्कृट॥ वर्तमनिरित्यादि॥ क्षिपेः किच्च॥ क्षिपणिरायुधं॥ अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः॥ सर्पिः छादिश्छर्दि
ष्क॥ चकारान्कृट॥ वर्तमनिरित्यादि॥ क्षिपेः किच्च॥ क्षिपणिरायुधं॥ अर्चि॥ शोचि दीप्तिः॥ हविः॥ सर्पिः॥ इस्मन्त्रिन्क्विषु च॥
भ्य इसिः॥ अर्चिर्ज्वाला॥ इ द्दत्वोप्यय॥ अग्नेर्भ्राजते॥ चर्यः॥ शोचि दीप्तिः॥ हविः॥ सर्पिः॥ इस्मन्त्रिन्क्विषु च॥
छर्दिः॥ पटलं॥ छर्दिर्वमनं व्याधिः॥ इद्दंतोपि॥ छर्दीतीमाह शूलवान्॥ बृंहेर्नलोपश्च॥ बर्हिर्नाकुशो
३५ द्युतेरिसिन्नादेश्च जः॥ ज्योतिः॥ वसोरुचेः संज्ञायां॥ वस्कु रोचिर्यत्र॥ भुवः कित्॥ भुविः समुद्रः॥ सहे
शुभ्रणो॥ द्युतेरिसिन्नादेश्च जः॥ ज्योतिः॥ वसोरुचेः संज्ञायां॥ वस्कु रोचिर्यत्र॥ भुवः कित्॥ भुविः समुद्रः॥ सहे
धश्च॥ सधिरनड्वान्॥ पिषनेस्पुक॥ पाथिश्चक्षुः समुद्रयो॥ जनेरुसि॥ जकजननं॥ मनेर्धश्छंदसि॥ मधु॥

(आर्धधातुकत्वा)भावात् ख्यायादेशो न॥ २

ग्रं॰

अर्त्तिपृवपियजितनिधनितपिभ्यो नित्॥ अरुः॥ रूपेर्व्यथिः॥ वपुः॥ यजुः॥ तनुः॥ तनुषीतनूषि॥ धकरस्थि
अर्त्तिपृवपियजितनिधनितपिभ्यो नित्॥ अरुः॥ रूपेर्ग्रथिः॥ वपुः॥ यजुः॥ तनुः॥ तनुषीतनूषि॥ धकरस्थि
यां॥ धनकवंशविसुद्धपिमिर्गुणः॥ किकरिष्पति॥ सांतस्य दलस्य बारूपं॥ नपुः सूर्याग्निश्चत्तुषु॥ एतेः
यां॥ धनकवंशविशुद्धपिभिर्गुणः॥ किकरिष्पति॥ सांतस्य दलस्य बारूपं॥ नपुः सूर्याग्निश्चत्तुषु॥ एतेः
णिच्च॥ आयुः॥ आयुषी॥ आयूंषि॥ चक्षेः शिच्च॥ चक्षुः॥ मुहेः किच्च॥ मुहुरव्ययं॥ बहुलमन्यत्रापि॥ आ
चक्षुः॥ परिचक्षुः॥ कृगृशृदृभ्यो वः॥ कर्वरो व्याघ्ररक्षसो॥ गवरो हकारो॥ शर्वरी रात्रिः॥ वर्व
र॥ प्राकृतो जनः॥ चर्वरं॥ नौ सदेः॥ निषद्वरः पंकजंबालः॥ निषद्वरी रात्रिः॥ इण्नशजिसर्त्तिभ्यः क्वरप्॥ अणि
छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः॥ एकादशैते वरजन्तयो निपा
पात्यंते॥ छिदिरच्छदरलयोरत्नकारोनादेशः॥ छिदिर्गुणाभावश्च॥ छित्वरो धूर्त्तः॥ छत्वरो गृहं कुंज
॥ धीवरः कैवर्त्तः॥ पीवरः स्थूलः॥ मीवरो हिंसकः॥ चिनोतेर्दीर्घश्च॥ चीवरं भिक्षुकप्रावरणं॥
यो॥ धीवरः कैवर्त्तः॥ पीवरः स्थूलः॥ मीवरो हिंसकः॥ चिनोतेर्दीर्घश्च॥ गह्वरं॥ कटेर्वर्षादौ॥ कट्वरं व्यंजनं॥ यमे
तीवरो जातिविशेषः॥ नीवरः परिव्राट्॥ गाहतेर्ह्रस्वत्वं च॥ गह्वरं॥ कटेर्वर्षादौ॥ कट्वरं व्यंजनं॥ यमे

सि· को
ईकारः॥ संवद्गुनोन्दपः॥ पदेसंपदर इत्येके॥ इण्रसिञ्जिदीङुष्यविभ्योनक्॥ इनः सूर्येनृपेपत्यौ॥ सि
नः काणं॥ जिनोर्हन्॥ दीनः॥ उष्मः॥ ऊनः॥ फेनमीनौ॥ एतौनिपात्येते॥ स्फायतेः फेनः॥ मी
३५ नः॥ कृषेर्वर्णे कृष्णः॥ बन्धेर्बधिबुधीच॥ ब्रध्नो बुध्नः॥ धापॄवस्यज्यतिभ्योनः॥ धानम्॥ ष्ठयवोस्त्रि
यः॥ पूर्णं पत्रं॥ पर्णः किंशुकः॥ वस्नोमूल्ये वस्तनेच॥ जेर्वौ॥ चेनः॥ अत्न आदित्यः॥ बाहुलका अ४
त् श्लक्ष्णे॥ श्रोणः पंगुः॥ लक्षेरट्च॥ लक्ष्मेश्चुरादिण्यंतान्नः स्यान्नस्याडागमश्च॥ च इसुडित्येके॥
लक्षणं॥ लक्ष्मणं॥ नाम्नि चिन्हे च॥ लक्ष्मणो लक्ष्मणश्च रामभ्राता॥ लक्ष्मणौसंयोषायां सारसस्य हं६
च लक्ष्मणा॥ वनेरिच्चोपधायाः॥ वेन्नःजदी॥ सिवेष्टयूच॥ दीर्घो च्चोपधायाः सामर्थ्यात् गुणः॥ स्यू
नः आदित्यः॥ बाहुलकात्केवलोऽनः॥ ऊतुः॥ अंतरगत्वाद्धि गुणः॥ स्योनः॥ कृवृजृसिद्रुपन्यनिस्व ३५
पिभ्योनित्॥ कर्णः॥ वर्णः॥ जर्णश्चंद्रे स्रोचे॥ सेना॥ द्रोणः॥ पन्नेतिनिर्वेगतिः॥ अन्नमाहनः॥ स्व
५१

प्नः निद्रा॥ धेट इच्च। धेनः सिंधुर्नदीधेना॥ तृषिशुषि रसिभ्यः कित्॥ तृष्णा॥ शुष्मः सूर्यो वह्निश्च॥ र
त्नं द्रव्यं। सुञो दीर्घश्च। सूना वधस्थानं॥ रमेस्तश्च। रमयती तिरत्नं। रास्ना सास्ना स्थूणा वी
णाः। रास्ना गंधद्रव्यं। सास्ना गोकंबलः। स्थूणा गृहस्तंभः। वीणा वल्लकी। गादाभ्यामिष्णुच्।
गेष्णुर्गायनः। देष्णुर्दाता॥ कृत्यशूभ्यां क्स्नः। कृत्स्नं। अक्ष्णं अखंडं। तिजेर्दीर्घश्च। तीक्ष्णं। श्लि
षेरच्चोपधायाः। श्लक्ष्णं। यजिमनिशुंधिदसिजनिभ्यो युच्। यज्युरध्वर्युः। मन्युर्दैन्ये क्रतौ
क्रुधि। शुंध्युरग्निः। दस्युस्तस्करः। जन्युः शरीरी। भुजिमृङ्भ्यां युक्त्युकौ। भुज्युर्भाजनं॥ म
त्युः॥ सर्तेरयुः॥ सरयुर्नदी॥ अयूरिति पाठांतरं॥ सरयूः॥ पानीविविषिभ्यः पः॥ पाति रक्षत्यस्मा
त दात्मानमिति पापं द्योगात् तापः पुरुषः॥ नेपः पुरोहितः॥ बाहुलकात् गुणाभावे॥ नीपो वृ
क्षविशेषः॥ वेष्पः॥ पानीयं॥ च्युवः किच्च॥ च्युपो वक्त्रं॥ स्तुपो दीर्घश्च॥ स्तूपः समुच्छ्र

सि॰कौ॰

पः॥ सुशृभ्यां निच्च। चाक्षित्तु। सूपः। बाहुलकादुत्वं। शूर्पं। कुयुभ्यां च। कुर्वंति मंडूका अस्मिन् कूपः। सुवं
३८ तिवृभेऽस्मिन्नप्ररूपितियूपोपयरल्पने॥ खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः॥ सहैते पप्रत्ययांता॥
खनतेर्नकारस्य षत्वं॥ खष्पः क्रोधबलात्कारौ॥ शीलतेर्ह्रस्वः॥ शिल्पं कौशलं॥ शसेर्हिंसायां॥ निपात
नालतृणं शष्पं॥ बालतृणं प्रतिभाक्षयश्च॥ बाधतेः षः॥ बाष्पो नेत्रजलोष्मणोः॥ बाष्पं च॥ रौतेर्दीर्घः॥ रूपं स्व
भावसौंदर्यं॥ पृ॥ पर्पो गृहं बालतृणं पशुपीठं च॥ तलप्रतिष्ठाकरणे चुरादित्वाण्णिचो लुक्॥ तल्पं श
य्यादृतादेषु॥ स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्॥ अयामन्तेति णेरयादेशः॥ स्तनयित्नुः॥ बलाहकः॥
हर्षयित्नुः॥ पोषयित्नुः॥ गदयित्नु॥ वाग्दूकः [?]॥ मदयित्नुर्मदिरा॥ कृहनिभ्यां क्नुः॥ कृत्नुः शिल्पी॥ ह
२ त्नुर्व्याधिः॥ शत्रुः॥ गमेः सन्वच्च॥ जिगत्नुः॥ दाभाभ्यां नुः॥ दानुर्दाता॥ भानुः॥ वचेर्गश्च॥ वग्नुः॥ धेट इ ३८
च्च॥ धयति तामिति धेनुः॥ सुवः कित्॥ सूनुः पुत्रनुजखौ [?]॥ जहातेर्द्वे अन्तलोपश्च॥ जह्नुः॥ स्थो णुः॥ स्थाणुः॥

कीलेऽस्थिरे हरे॥ अजिररीभ्यो निच्च॥ अजेर्वी॥ वेणुः॥ वर्णुर्नदे देशभेदयोः॥ रेणुर्द्वयोस्त्रियां धूलिः॥
विषेः किच्च॥ किष्णुं॥ कृदाधारार्चिकलिभ्यः कः॥ बाहुलकाद्भकस्येत्संज्ञा॥ कर्को धवलघोटकः॥ दाके
दात्रं॥ धाको नद्यन्न॥ आधारश्च॥ राका पौर्णमासी॥ अर्कः॥ कल्कः पापाशयेऽपि पदभेदे किट्टे
ऽपि॥ सृवृभूशुषिमुषिभ्यः कक्॥ सृकः उत्पलवातयोः॥ वृकः श्वापदकाकयोः॥ भेकं छिद्रं॥ शुष्कः॥ मु
ष्कोऽण्डः॥ शुकवल्कोल्काः॥ शकभेरत्सलोपः॥ शकः॥ वल्कं वल्कलं मसि स्त्रियां॥ उष दाहे॥ षस्य लः॥ उल्का॥ उणभीका
पाशल्यतिमर्चिभ्यः कन्॥ एकमुख्यान्यकेवलाः॥ भेको मंडूकमेघयोरिति विश्वमेदिन्यौ॥ काकः॥ पाकः
शिशुः॥ शल्कं। शकलं। अत्कः पथिकः शरीरावयवश्च। मर्कः शरीरं वायुः। नोहः। जहातेः कन्ने
स्याक्षौ॥ निहाका गोधिका॥ नौसदरीङ्च॥ निष्का स्त्री हम्मितसम्ले॥ स्यमेरीट् च॥ स्यमीको वल्मीकः॥
वृक्षभेदश्च॥ उदस्त्रस्वश्च इति केचित्॥ स्यमिकः॥ अजियुधूनीभ्यो दीर्घश्च॥ वीकः स्याद्वातपक्षिणोः॥

सि·कौ·

३९ यूका ॥ धू कोवायुः ॥ नीको वृक्षविशेषः ॥ क्रियार्थश्च लोपः ॥ ईका ॥ स्त्रीकात्र पामता ॥ शकेरुनोंतो
न्त्युनयः ॥ उन उत ओंत उनि एते चत्वारः स्युः ॥ शकुनः ॥ शकुंतः ॥ शकुंतिः ॥ शकुनिः ॥ भुवो झिच् ॥ भवंति
वर्त्तमानः कालः ॥ बाहुलकात् अवंश्च ॥ अवंतिः ॥ वदेर्वदंतिः ॥ वदंती ॥ किंवदंती जनश्रुतिः ॥ कन्यु
च्क्षिपेश्च ॥ चात् झच् ॥ क्षिपण्युर्वसंतः ॥ इत्युज्ज्वलदत्तः ॥ भुवन्युः ॥ स्वामिसूर्ययोः ॥ अर्त्तेरुनन्दश्च ॥ चात्क्षि
पेः ॥ नदन्कर्मघः ॥ क्षिपणुर्वातः ॥ कृवृदारिभ्य उनन् ॥ करुणो वृक्षभेदः स्यात्करुणा च कृपा मता ॥ व
रुणः ॥ दारुणं ॥ त्रतेश्च लोपः ॥ तरुणस्तलुनो वैयुः ॥ क्षुधिपिशिमिथिभ्यः कित् ॥ क्षुधुनो म्लेच्छ
जातिः ॥ पिशुनः ॥ मिथुनं ॥ फलेर्गुक्च ॥ फल्गुनः ॥ अर्जुनः ॥ फाल्गुनः पार्थः ॥ अशेर्लशच ॥
पशुनं ॥ अर्जेर्णिलुक्च ॥ अर्जुनः ॥ तृणाख्यायां चित् ॥ चित्वादंतोदात्तः ॥ अर्जुनं तृणं ॥ अर्त्ते ३९
श्च ॥ अरुणः ॥ अजिमवीशीङ्भ्यश्च ॥ वयुनं देवमंदिरं ॥ वयुनो ॥ शयुनो अजगरः ॥ वृतृवदिह

निकमिकषिभ्यः सः ॥ वर्षं ॥ तर्षः प्लवसमुद्रयोः ॥ वत्सः ॥ वत्सं वक्षः ॥ हंसः ॥ कंसो स्त्रीपानभाजनं ॥ कषः ॥
लषेरचोपधायाः ॥ लक्षः ॥ मनेर्दीर्घश्च ॥ मासः ॥ अशेर्देवने ॥ अक्षः ॥ स्नुवृश्चिकृत्यृषिभ्यः कित् ॥
स्नुषा ॥ वृक्षः ॥ कृत्स समुद्रकः ॥ ऋक्षं नक्षत्रं ॥ ऋषजातिः ॥ ऋक्षोद्रिभेदे भल्लूके ॥ उंदिगुधिकु
षिभ्यश्च ॥ उत्सः ॥ प्रस्रवणं ॥ गुत्सः स्तबकः ॥ कुक्षो जठरं ॥ गृधिपण्योर्दकौ च ॥ गृत्सः कामदेवः
॥ पक्षः ॥ अशेः सरः ॥ अक्षरं ॥ वसेश्च ॥ वत्सरः ॥ संपूर्वाच्चित् ॥ संवत्सरः ॥ परिवत्सरः ॥ कृधूम
दिभ्यः कित् ॥ बाहुलकान्न षत्वं ॥ कृसरः स्यात्तिलौदनं ॥ धूसरः ॥ मत्सरो मक्षिका ज्ञेया भ मसरा
रा स्त्री वसा मसा ॥ पतेरश्च कः ॥ पत्सलः ॥ पाथाः ॥ तन्यृषिभ्यां क्सरन् ॥ तसरं सूत्र ६
वेष्टनं ॥ ऋक्षरः ऋत्विक् ॥ पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं च ॥ पीयुः सौत्रो धातुः ॥
पीयालो वृक्षभेदः ॥ कुणालो देशभेदः ॥ कटिकुषिभ्यां काकुः ॥ कुठाकुः पक्षी ॥ कुषाकुरग्निः

पा १

३९ स्तूर्यश्च॥ सर्त्तेर्दुकच॥ स्दृदाकुर्वातिसरितो॥ स्तनेर्दिश्च॥ वार्त्तकिः॥ बाहुलकाद्दुरस्यात्त्वं॥ वार्त्तीकं॥ पर्देनिस्वे
प्रसारणमल्लोपश्च॥ पृदाकुः वृश्चिके व्याचित्रके चसरीसृपे॥ स्ट युवचिभ्यो न्यक्गागूजन्कुच॥ अन्युचञ्
गूच॥ अन्कुचूरतक्रमात्स्युः॥ सरण्युर्मेघवातयोः॥ यवागूः॥ वचन्कुर्विप्रः॥ वाग्मिनोः॥ आनकः शीङभि
यः॥ शयानको जगरः॥ भयानकः॥ आणकालूघञ्शिंघिधान्भ्यः॥ लवाणंकदात्रं॥ धवाणकोवातः॥
शिंघाणकः श्लेष्मा॥ पृषोदरादित्वात्पक्षेकलोपः॥ शिंघाणनासिकामलं॥ धाणकोदीनारभागः॥ उ
ल्मुक दर्विहोमिन॥ उषादाहे॥ षस्यूक्नः॥ मुकप्रत्ययश्च॥ उल्मुकंज्वलदंगारं॥ दृणातेर्विः॥ दर्विः॥ जि
होतेर्मिन्॥ होमी॥ हियः कुक्रश्चलोवा॥ हीकुः॥ हीकुः॥ लज्जावान्॥ हसिमृग्रिण्वामिदमि लूपूधूर्वि
भ्यस्तन्॥ दृशभ्यस्तनस्यात्तिद्वितुरितिनिद्दं॥ हस्तः॥ मर्त्तः॥ एतः कर्बुरः॥ वालः॥ अंतः॥ दंतः॥ लोनः॥ स्यादलु
श्चचिन्हयोः॥ पोतोबालवहित्रयोः॥ धूर्तः॥ बाहुलकात्सुसे र्धिश्च॥ लूतं पापंधूलिज्जराच॥ नेत्रि ३९

पातेर्म्नल्या परिकिलं

आप्नदूच। नापितः। तनिमृङ्भ्यां किच्च॥ ततः। मृतं। अजिघृसिभ्यः क्तः। अक्तं। घृतं। सितं। इलनिभ्यां
दीर्घश्च। दूतः। तातः। जेमूट्चोदात्तः। जीमूतः। लोष्टपलितौ। लुनातेः क्तः तस्यसुट्धातोर्गुणः। लोष्टं।
पलितं। हृश्याभ्यामितन्। हरितः। श्येतोवर्णभेदो। रुहेरश्च लोवा। रोहितोमृगमत्स्ययोः। लोहितं
रक्तं। पिशेःकिच्च। पिशितंमांसं। श्रुदक्षिस्पृहिगृहिभ्य आय्यः। श्रवाय्यो यज्ञपशुः। दक्षाय्योग
गरुडोगृध्रश्च। स्पृहयाय्यः। गृहयाय्यो गृहस्वामी। दधिषाय्यः। दधातेःद्वित्वमित्वंषुक्च। मित्रवयो
दिधिषाय्यः। वृञ एण्यः। वरेण्यः। स्तुवःकेसय्यः छंदसि। स्तुषेय्यंपुरुवर्पसं। राजेरन्यः। राजन्योव
ह्निः। शृरम्योश्च। शरण्यं। रमण्यं। अर्तेर्निच्च। अरण्यं। पर्जन्यः। पृषुसेचने। षस्यजः। पर्जन्यः। श
क्रमेघयोः। वदेरान्यः। वदान्यस्त्यागिवाग्मिनोः। अमिनक्षियजिवधिपतिभ्योत्रन्। अमत्रं
भाजनं। नक्षत्रं। यजत्रः। वधत्रमायुधं। पतत्रं तनूरुहं। गडेरादेश्चकः। कडत्रं। डलयोरैकत्वस्म

८० रणात्कृन्तत्रं ॥ वृत्रश्चित् ॥ वरत्राचर्ममयीरज्जुः ॥ सुविदे कत्रच ॥ सुविदत्रं कुटुंबकं ॥ कृतेर्नुम्च ॥ कृन्तत्रं लांगलं ॥ भृमृदृशियजि
पर्विपच्यमितमिनमिहर्यिभ्योतच् ॥ स्त्राभ्योतच्स्यात् ॥ भरतः ॥ मरतोमृत्युः ॥ दर्शतः सोमसूर्ययोः ॥ यजतऋत्विक् ॥ पर्वतः ॥
पचतोग्निः ॥ अमतोरोगः ॥ तमतस्तृष्णापरः ॥ नमतः प्रह्वः ॥ हर्यतोश्वः ॥ पृषिरंजिभ्यांकित् ॥ पृषतोमृगोबिंदुश्च ॥ रजतं ॥ खलतिः ॥ खल
तेः सलोपः ॥ अनत्वप्रसयांतस्यइतंच ॥ खलतिर्निष्केशशिरः ॥ शीङ्शपिरुगमिवंचिजीविप्राणिभ्योथ ॥ ससभ्योथः स्यात् ॥ श
यथोजगरः ॥ शपथः ॥ रवथः कोकिलः ॥ गमथः पथिकः पंथाश्च ॥ वंचथः धूर्त्तः ॥ वंदीतिपाठेवंदतेवंद्यतेवावंदथः स्तोतास्तुत्यश्च ॥
जीवथआयुष्मान् ॥ प्राणथोबलवान् ॥ बाहुलकाद्शमिदमिभ्यां ॥ शमथस्तुशमः शांतिर्दांतिस्तु दमथोदमः ॥ भृञश्चित् ॥ भ
रथोलोकपालः ॥ रुदिविदिभ्यांङित् ॥ रोदितीतिरुदिथः शिशुः ॥ वेत्तीतिविदथः ॥ उपसर्गेवसेः ॥ आवसथोगृहं ॥ संवसथो
ग्रामः ॥ अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योसच् ॥ त्रयोदशभ्योसच्स्यात् ॥ अतसीत्यवसः च
पुरात्मा च ॥ अवतीत्यवसः राजाभानुश्च ॥ चमंत्यस्मिन् चमसः सोमपानपात्रं ॥ ताम्यत्यस्मिन्तमसः अंधकारः ॥ नम ८०

सः अनुकूलं । रभसोवेगहर्षयोः । लभसोधनं । याचकश्च । नभतिनभ्नातिवानभसः आकाशं ।
तपसः पक्षि चंद्रश्च । पतसः पक्षी । पनसः कंटकीफलं । पपासः पण्यद्रव्यं । महसं ज्ञानं । वेअस्तुट्
च । बाहुलकाद्दालाभावः । वेतसः । वहियुभ्यांणित् । वाहसोजगरः । यावसस्तृणसंघातः ।
वयश्च । वयगतौ । वायसः काकः । दिवः कित् । दिवसं दिवसः । कृशृशलिकलिगर्दिभ्योभच् ॥
करभः । शरभः । शलभः । कलभः । गर्दभः । ऋषिवृषिभ्यांकित् । ऋषभः । वृषभः । रुषेर्नित्वुग्च । रुषहिं
सायां । अस्मादभच्नित् किस्याल्लुगादेशश्च । लुषभोमत्तदंतिनि । रासिवल्लिभ्यांच । रासभः । व
ल्लभः । जृविशिभ्यांझच् । जरंतोमहिषः । वेशंतः पल्वलं । रुहिनंदिजीविप्राणिभ्यः षित्आशिषि ॥ रो
हंतोवृक्षभेदः । नंदंतः पुत्रः । जीवंतऔषधं । प्राणंतोवायुः । षित्वान्ङीष् । रोहंती । तृभूवहिवसिभा
सिसाधिगडिमंडिजिनंदिभ्यश्च । दशभ्योझच्स्यात्सचषित् । तरंतः समुद्रः । तरंतीनौका । भवंतः

कालः। बृहंतो वायुः। वसंतो ऋतुः। भासंतः सूर्यः। साधंतो भिक्षुः। गडेर्घटादित्वान्मित्वं ह्रस्वः। अया
मंतेति णेरयादेशः। गडयंतो जलदः। मंडयंतो भूषणं। जयंतः शक्रपुत्रः। नंदयंतो नंदकः। हंतेर्मुट् हि च। हेमं
४१ तः। भंदेर्नलोपश्च। भदंतः प्रव्रजितः। ऋच्छेररः। ऋच्छरा वेश्या। बाहुलकाज्जर्झरा झर्झरा दय। अर्तिकमिभ्रमि
चमिदेविवासिभ्यश्चित्। षड्भ्योऽरश्चित्स्यात् अररं कपाटं। कमरः कामुकः। भ्रमरः। चमरः। देवरः। वास
रः। कुवः कुरन्। कुररः पक्षिभेदः। अंगिमदिमंदिभ्य आरन्। अंगारः। मदारो वराहः। मंदारः। गडेः क
उन्। कडारः। शृंगारभृंगारौ। शृभृञ्भ्यामारन्नुम्गुकौ ह्रस्वश्च। शृंगारो रसः। भृंगारः कनकालुका। कं
जिमृजिभ्यां चित्। कंजिः सौत्रः। कंजारो मयूरः। मार्जारः। कमेः किदुच्चोपधायाः। चिदित्यनुवृत्तेरंतोदात्तः।
कुमारः। तुषाराद्यश्च। तुषारः। कासारः। सहारः आम्रभेदः। दीङो नुट् च। दीनारः सुवर्णाभरणं। सर्वे ४१
रपः पुक् च। सर्षपः। उषिकुटिदलिकचिखजिभ्यः कपन्। उषपो वह्निः सूर्ययोः। कुटपो मानभांडं। दलपः

प्रहरणं। कचपं शाकपात्रं। खजपं घृतं। क्वणेः संप्रसारणं च। कुणपं। कपश्चाक्रवर्मणस्य। स्वरे भेदः। वि
टपपिष्टपविशिपोलपाः। चत्वारोऽमी कपन्प्रत्ययांताः। विट शब्दे। विटपः। विशतेरादेः पः प्रत्ययस्य
तुट्। षत्वं। पिष्टपं भुवनं। विशतेः प्रसयादि रिवं। विशिपं मंदिरं। वलतेः संप्रसारणं। उलपं कोमलतृणं। वञ्चे
स्तिकन्। वर्तिका। कृतिभिदिलतिभ्यः कित्। कृत्तिका। भित्तिका। भित्तिः। लत्तिका गोधा। इष्यशिभ्यां तकन्
इष्टका। अष्टका। इणस्तशन्तशसुनौ। एतशो ब्राह्मणः। स एव एतशाः। वियतिभ्यां तनन्। वीगसादौ
वेतनं। पत्तनं। दृदलिभ्यां भः। दर्भः। दल्भः। स्याद्दाषचक्रयोः। आर्तिगृभ्यां भन्। अर्भः। गर्भः। इणः कित्।।
इभः। असिसंजिभ्यां क्थिन्। अस्थि। सक्थि। प्लुषिकुषिशुषिभ्यः क्सिः। प्लुक्षिर्वह्निः। कुक्षिः। शुक्षिर्वा
तः। अशेर्नित्। अक्षि। इषेः क्सुः। इक्षुः। अवितृस्तृतंत्रिभ्य ईः। अवी नारी रजस्वला। तरीः नौः। स्तरीः। तंत्रीर्वी
णादिगुणः। यापाकिद्द्वे च। पपीः। पपीः स्यात् सोमसूर्ययोः। लक्षेर्मुट् च। लक्ष्मीः। इत्युणादौ तृती

सि॰कौ॰

सि॰कौ॰

४२ पुः पादः॥ वातप्रमीः॥ वातशब्दे उपपदे मा धातोरीप्रत्ययः स्यात्। स च कित्। वातप्रमीः॥ अयं स्त्रीपुंसयोः॥ ऋतन्यंजिव
न्यंज्यर्पिमद्यत्यंगिकुयुकृशिभ्यः कत्निच्यतुजलिजिष्टुजिष्ठजिसन्स्यनिथिन्नुल्यसासानुकः॥ द्वादशभ्यः
क्रमात्स्युः। अर्त्तेः कत्निच् यण्। बहुमुष्टिः। करोरत्निः सो रत्निः। प्रसृतांगुलिः। तनोतेर्यतुच्। तन्यतुर्वायुः॥
रात्रिश्च॥ अंजेरलिच्॥ अंजलिः॥ वनेरिष्टुच्॥ वनिष्टुः स्थूविरांत्रं॥ अंजेरिष्टच्॥ अंजिष्ठो भानुः॥ अर्पयतेरिसन्॥
अर्पिसः अग्रमांसं॥ मदेस्यन्॥ मत्स्यः॥ अतेरिथिन्॥ अतिथिः॥ अंगेरलिः॥ अंगुलिः॥ कौतेरसः॥ कवसः॥ अचे
रलुक॥ कवचं॥ यातेरासः॥ यवासः दुरालभा॥ कृशेरानुक्॥ कृशानुः॥ शृःकरन्॥ उत्तरसूत्रे किद्ग्रहणादिह
ककारस्य नेत्वं॥ शर्करा॥ पुषः कित्॥ पुष्करं॥ कलश्च॥ पुष्कलं॥ गमेरिनिः॥ गमिष्यतीति गमी॥ आङि
णित्। आगामी। भुवश्च। भावी। प्रेस्थः। प्रस्थायी। परमे कित्। परमेष्ठी। मंथः। मंथतेरिनिः कित्स्यात्। कित्वा
न्नकारलोपः। मथाः। मंथानौ। पतस्थ च। पंथाः। पंथानौ। खजेराकः। पक्षी। बलाकादयश्च। बलाका॥ ४२

खजाकः

का

शलाका। पताका। पिनाकादयश्च। पातेरित्वं नुम् च। क्लीबपुंसोः पिनाकः स्यात् शूलशंकरधन्वनोः। तडआघा
ते। तडाकः। कषिदूषिभ्यामीकन्। कषीका पक्षिजातिः। दूषीका नेत्रयोर्मलं। अनिहृषिभ्यां किच्च। अनीकं। हृ
षीकं। चंकणः कंकणाच। कण शब्दे अस्माद् घञ् तादीकन् धातोः कंकणादेशश्च। घंटिकायं। कंकणीकासै
वप्रतिसरापि च। शृपृवृञ्भ्यो हि रुक् चाभ्यासस्य। शर्शरीको हिंस्रः। पर्परीको दिवाकरः। वर्वरीकः कुंचितके
शः। पर्फरीकादयश्च। स्फुर स्फुरणे। अस्मादीकन् धातोः पर्फरादेशः। पर्फरीकं किसलयं। दर्दरीकं वादि
त्रं। झर्झरीकं शरीरं। तित्तिडीको वृक्षभेदः। चरेर्नुम् च। चंचरीको भ्रमरः। मर्मरीको हीनजनः। कर्करीका गलंतिका।
पुणतेः पुंडरीकं। पुंडरीको व्याघ्रोऽग्निर्दिग्गजश्च। इषेः कित् ह्रस्वश्च। इषीका शलाका। ऋजेश्च। ऋजीकं उप
हतः। सर्तेर्नुम् च। सृणीका लाला। मृडः कीकच् कंकणौ। मृडीको मृगः। मृडंकणः शिशुः। अलीकादयश्च।
कीकजंता निपात्यंते। अल भूषणादौ। अलीकं मिथ्या। विपूर्वाद्व्यलीकं विप्रियं खेदश्च। वलीकं पटलप्रांते

सि·कौ उत्पादि॥ कृत्वृभ्यामीषन्॥ करीषोऽस्त्री शुष्कगोमये॥ तरीषः तरीता॥ शॄपॄभ्यां किच्च॥ शिरीषः॥ पुरीषं॥ अर्जेर्

४२ ऋज च॥ ऋजीषं पिष्टपाचनं॥ अंबरीषः॥ अयं निपात्यते॥ अबि शब्दे॥ अंबरीषः पुमान् भ्राष्ट्रं॥ अमरस्तु क्लीबेंऽब

रीषं भ्राष्ट्रो ना॥ कृशृपृकटिपटिशौटिभ्य ईरन्॥ करीरो वंशांकुरः॥ शरीरं॥ परीरं फलं॥ कटीरः कंदरो

जघनदेशश्च॥ पटीरश्चंदनः कंदुकः॥ कामश्च॥ शौटीरस्त्यागिवीरयोः॥ ब्राह्मणादित्वात् ष्यञ्॥ शौटीर्यं॥

शे· वशेः कित्॥ उशीरं॥ कशेर्मुट् च॥ कश्मीरो देशः॥ कुशश्च॥ कुरीरं॥ मैथुनं॥ घसेः किच्च॥ क्षीरं॥ गभीर

गंभीरौ॥ गमेर्भः॥ पक्षे नुम् च॥ विषाविहा॥ स्यतेर्जहातेश्च विपूर्वाभ्यामा प्रत्ययः॥ विषा बुद्धिः॥ विहा स्वर्गः॥

अवयवे॥ पचेरालिमच्॥ पचलिमा वह्निर्वायुः॥ शीङो धुक्लक्वलञ्वालनः॥ चत्वारः प्रत्ययाः स्युः॥ शी

धु मद्यं॥ शीलं स्वभावः॥ शैवलः॥ शैवालं॥ बाहुलकात् वस्य पोऽपि॥ शेपालं शैवलो न स्त्री शेपालो जलनी पु ४२

लिका॥ मृकणिभ्यामूकोकणौ॥ मरूको मृगः॥ काणूकः काकः॥ वलेरूकः॥ वलूकः पक्षी उत्पल

मूलं च। उलूकादयश्च। वलेः संप्रसारणमूकश्च। उलूकौ बिडूपेचकौ। वावदूको वक्ता। भल्लूकः। शमे

बुक् च। शंबूको जलशुक्तिः। शल्लिमंडिभ्यामूकण्। शाल्लूकं कंदविशेषः। मंडूकः। नियो मिः। नेमिः। अर्ते

रूच्च। ऊर्मिः। भ्रुवः कित्। भूमिः। अश्नोते रश् च। रश्मिः किरणो रज्जुश्च। दलेः। दल विशरणे। दल्मिरिंद्रा

युधं। वीज्याज्वरिभ्यो निः। बाहुलकाण्णत्वं। वेणिः स्यात्केशविन्यासः। भवेणी च स्त्रियामुभौ। ज्यानिः।

जूर्णिः। सृवृषिभ्यां कित्। सृणिरंकुशः। वृष्णिः क्षत्रियमेषयोः। अंगेर्नलोपश्च। अग्निः। वहिश्रि

श्रुयुद्रुग्लाहात्वरिभ्यो नित्। वह्निः। श्रेणिः। श्रोणिः। योनिः। द्रोणिः॥ ग्लानिः॥ हानिः। तूर्णिः। बा

हुलकाद् म्लानिः। घृणिपृश्निपार्ष्णिचूर्णिभूर्णिः एते पंच निपात्यंते॥ घृणिः किरणः॥ स्पृशतेः सलोपः।

पृश्निरल्पशरीरः। पृषेर्वृद्धिश्च। पार्ष्णिः पादतलम्। निसुज्वलदंतः पुमान् पार्ष्णिस्तु घोरधः। चरेरुपधाया

उत्वं। चूर्णिः। कपर्दिकाशतं। बिभर्तेरुत्वं। भूर्णिः धरणी। वृदृभ्यां विन्॥ वर्विर्घस्मरः॥ दर्विः। जृशृस्तृजा

गृभ्यः क्विन्॥ जीर्विः पशुः॥ शीर्विः हिंस्रः॥ स्तीर्विरध्वर्युः॥ जागृविर्नृपः॥ दिवोद्वे दीर्घश्चाभ्यासस्य॥ दीदिविः
स्वर्गभक्षयोः॥ कृविघृविछविस्थविकिकीदिविः॥ कृविस्तंतुवायद्रव्यं॥ घृविर्वराहः॥ छास्थान्हृस्वत्वंच॥ छ
विः दीप्तेः॥ स्थविः तंतुवायः॥ दीव्यतेः किकी पूर्वात्किकिदिविश्चाषः॥ बाहुलकात्न्हृस्वदीर्घयोर्विनिमयः॥
चाषेण किकिदिविना॥ पातेर्डतिः॥ पतिः॥ शाके ऋतिन्॥ शाकुन्तु॥ अमेरविः॥ अमविः कालः॥ बहिवस्यस्य
त्तिभ्यश्चिन्॥ वहतिः पवनः॥ वसातिर्ग्रहयामिन्योः॥ अरतिः क्रोधः॥ अंचकोवा॥ अंचेकोवा॥ अकातिः
॥अंचति वातः॥ हतेरंहंच॥ हंतेराति स्याद्रंहादेशश्चधातोः॥ हातिउरितमनयाअंहातिर्दानं॥ घ्ना
देशनंनिर्वपणमपवर्जनमंहातिः॥ रमेर्नित्॥ रमातिः॥ कालकाम्यो॥ सूङः क्रिः सूरिः॥ आदि
शाद्रि भूशुभिभ्यः क्रिन्॥ अद्रिः पर्वतः॥ आद्रिः शर्करा॥ भूरिः प्रचुरं॥ शुभ्रिर्ब्रह्मा॥ वंक्र्यादयश्च
श्च॥ क्रिन्नंता निपात्यंते॥ वंकिर्वा धमेदः॥ गृहदारुपार्श्वास्थिच॥ वपिः क्षेत्रं॥ अंघ्रिः हिम्मंच